Bodleian Libraries
UNIVERSITY OF OXFORD

This book is part of the collection held by the Bodleian Libraries and scanned by Google, Inc. for the Google Books Library Project.

For more information see:

http://www.bodleian.ox.ac.uk/dbooks

This work is licensed under a Creative Commons Attribution-NonCommercial-ShareAlike 2.0 UK: England & Wales (CC BY-NC-SA 2.0) licence.

150/-

शुद्धिविवेकप्रारम्भः

॥श्रीकाशीविश्वनाथपुरीमेमहल्लाछोटकीपीअरीपरयहवाबूकवलेश्वरसिंघकेमकानमेवौकिशु
नदयालसिंघकेछापाखानेमेगनेसप्रभाकरछापाखानेमेशुद्धिविवेकछापागयाजिसकोलेनाहोयसो
नद्सडकपरवाबूकवलेसरसिंघकेदुकानपरमिलैगा लौ॰ द्वारकानीवारी। छापागोपाल मी॰ चै॰ सु॰ २
सम्वत् १९४१॥

।बृहस्पतिः॥दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः अत्र दशा
हपदं स्वस्वजात्युक्ताशौचोपलक्षकम् सपिण्डाः सप्तपुरुषावधयः स्ववंश्याः सप्तमपुरुषादनन्तरं दशमपु
रुषं यावत्सकुल्याः दशमपुरुषादनन्तरं जन्मनाम्नोरविज्ञाने अस्मत्कुलजा इत्येवमाकारज्ञानगोचरा गोत्रजाः।
ज्ञायमानजन्मनाम्नां तु दशमपुरुषाऽधिकानां मरणजन्मनोः पक्षिणी ——— सपिण्ड इत्यनेनाग्रे वक्ष्यते तदयं।
सर्वैकवाक्यतयार्थः ब्राह्मणस्य सपिण्डे ब्राह्मणे मृते दशरात्रेण शुद्ध्यति सकुल्ये मृते त्रिरात्रेण तदूर्ध्वे ज्ञायमानज
न्मनामके कुलजे मृते पक्षिणी गोत्रजे स्नानमात्रेण क्षत्रियस्य सपिण्डे क्षत्रिये मृते द्वादशाहेन शुद्धिः सकुल्ये त्रिरात्रेण
तदूर्ध्वं पक्षिण्या गोत्रजे स्नानमात्रेण वैश्यस्य सपिण्डे वैश्ये मृते पञ्चदशदिनैः शुद्धिः सकुल्ये त्रिरात्रेण तदूर्ध्वं पक्षिण्या
गोत्रजे स्नानमात्रेण शूद्रस्य सपिण्डे मृते शूद्रे मासेन शुद्धिः सकुल्ये त्रिरात्रेण तदूर्ध्वं पक्षिण्या गोत्रजे स्नानमात्रेण
अ[illegible]त्र च सर्वत्र अहः पदं रात्रिपदं च॥अहो ऽत्र परं ज्ञातव्यम् यदा रात्रौ संध्ययोश्च मरणजन्मनी भवतस्तदाऽतीतदि
नेनैव सहाहोरात्रो ग्राह्यः।यदाह कश्यपः॥ रात्रावेव समुत्पन्ने मृते रजसि सूतके पूर्वमेव दिनं ग्राह्यम् यावन्नेवोदितो र

नातुस्पर्शनेपितुः॥ अंगिराः सूतकेसूतिकावर्जमङ्गस्पर्शोनदुष्यति संस्पर्शेसूतिकायास्तुस्नानमेवविधीयते। यदितुजनकः
पत्नीसंस्पर्शंसूतकेकरोतितदातस्यापियावत्सूतकमस्पृश्यत्वं॥ तथाचपराशरः यदिपत्न्यांप्रसूतायांद्विजःसंपर्क
मिच्छतिसूतकंतुभवेत्तस्ययदिविप्रःषडङ्गवित् षडङ्गविदपिविप्रोयदिसंपर्केसंस्पर्शंकरोतिप्रसूतायाःप
त्न्यास्तदातस्यसूतकंदशाहमस्पृश्यत्वंभवतीत्यर्थः॥ अत्रसंपर्कोऽभिगमइतिव्याख्यानमयुक्तं मातुरेवसूतकंतां
स्पृशतस्तुपितुर्नेतरेषामितिसुमन्तुनैकमूलत्वात् ब्रह्मपुराणे सूतकेतुमुखंदृष्ट्वाजातस्यजनकःशुचिःकृत्वास
चैलस्नानंतुशुद्धोभवतितत्क्षणात् —— अन्याश्चमातरस्तद्वत्तद्गेहंत्वव्रजन्तिचेत् सपिण्डाश्चापिसंस्पृश्याःस
न्तिसर्वेपिनित्यशः। अन्यामातरः सपत्नीमातरः तद्गेहंनव्रजन्तितद्गेहंगत्वातांचेन्नस्पृशन्तितदाशुद्धाएवस्नानेविना
पि एवंसपिंडाअपितत्स्पर्शेतुस्नानेनशुद्ध्यन्ति एवमेवहारलताआचारोपि अत्रस्त्रीजन्मनिस्नानानुपदेशात्पितुरपि
स्नानंविनैवशुद्धिरितिज्ञेयं तथा ब्राह्मणीक्षत्रियावैश्यप्रसूतादशभिर्दिनैः गतैः शूद्राचसंस्पृश्यात्रयोदशभिरेवच यत्तुसू
तिकासर्ववर्णानांदशरात्रेणशुद्ध्यतीतिशूद्रायाअपिदशरात्रेणस्पर्शशुद्धिःकथिताप्रचेतसासासच्छूद्राविषयाज्ञा
तव्यापैठीनसिः सूतिकांपुत्रजननींविंशतिरात्रेणस्नातांसर्वकर्माणिकारयेत् मासेनस्त्रीजननीं॥ अस्यार्थः॥

स्यं॥ कल्पो ज्योतिष्टोमाद्यनुष्ठानपद्धतिः तत्सहितं अङ्गैः समन्वितं शिक्षाद्य...
कल्पसूत्रमीमांसादिनिर्णीतार्थसहितं जानाति क्रियावान् श्रौतस्मार्ताग्निहोत्रादिक्रियावान् भवति तदा सूतकेन भव
ति एकाहाद्यशौचं न भवति तेन सद्यः शौचं भवतीत्यर्थः तथा एकाहाद् ब्राह्मणः शुद्धो योऽग्निवेदसमन्वितः हीने ही
नतरे चैव त्र्यहश्चतुरहस्तथा अग्निः श्रौतः स्मार्तं श्च वेदः सांगो ज्ञातार्थश्च ब्राह्मणश्चात्र विहितक्रियैकदेश-
वान् विवक्षितः तस्य एकाहः हीनः श्रौताग्निहीनः स्मार्ताग्निवान् सांगसार्थज्ञानसंपूर्णवेदवान् तस्य त्र्यहः शौचं ही
नतरोऽग्निद्वयहीनः सांगसार्थज्ञावसंपूर्णवेदवान् तस्य चतुरहाशौचकालः बृहस्पतिः॥ त्रिरात्रेण विशुद्ध्येत्तु विप्रो
वेदाग्निसंयुतः पंचाहेनाग्निहीनस्तु दशाहाद् ब्राह्मणब्रुवः अत्राग्निः स्मार्तः न हुतो वेदस्तस्य च पूर्ववत् त्र्यहः अ
ग्निद्वयहीनस्य अर्थात् वेदाङ्गशून्यकृत्स्नवेदाध्यायिनः पंचाहः परिशेषादग्निद्वयहीनस्य वेदैकदेशाध्यायि
नः षडहः अत्र वाक्यद्वये तुल्यन्यायतया अग्निद्वययुतस्यापि विज्ञातार्थकृत्स्नवेदवतः सकलविहितक्रियावतः ए
काहः तथाग्निद्वययुतस्य वेदशून्यस्य त्र्यहः ब्राह्मणब्रुवस्य दशाहः ब्राह्मणब्रुवश्च परिभाषितो व्यासेन गर्भाधाना
दिभिर्युक्तस्तथोपनयनेन च न कर्मकृन्न चाधीते स भवेद् ब्राह्मणब्रुवः तदयं सर्वैकवाक्यतयार्थः सांगसार्थज्ञानवेद

ब्राह्मणस्य स्वाध्यायाध्यापनानिवृत्त्यर्थं सद्यःशौचमिति शुद्धौ हि प्रोदशानेपि

नान्नभोजनप्रतिग्रहादिषु नेषु कर्त्तव्येषु ब्राह्मणादीनां दशाहादिकं संपूर्णाशौचमेवानुवर्त्तते॥ इति मिताक्षराकाराद
यः॥ तथा हि दशाहं शावमाशौचमिति सामान्यप्राप्तदशाहबाधपुरस्सरमेवह्येकाहाद्ब्राह्मणः शुद्ध्येदित्यादिविधाय
कं भवति बाधस्य चानुपपत्तिनिबन्धनत्वाद्यावत्यबाधितेऽनुपपत्तिप्रशमो न भवति तावदनेन बाधितव्यं अतः क्रिय
दनेन बाधितव्यमित्यपेक्षायामपेक्षितविशेषसमर्पणक्षयस्याग्निवेदसमन्वित इत्यादिवाक्यशेषस्य दर्शनादग्नि
होत्रादौ कर्मणि स्वाध्यायादौ च व्यवतिष्ठते न पुनर्दानादावपि तथा चैवं वचनैरेकवाक्यता भवति तथा उभयत्र दशा
हानि कुलस्यान्नं न भुज्यत इति दशाहपर्यन्तभोजनादिकं प्रतिषेधयद्भिर्यमादिवचनैरविरोधोपि सिद्ध्यतीत्यतः
क्वाचित्कमेवेदमशौचसंकोचविधानं न पुनः सर्वसंव्यवहारादिगोचरमित्यलमति प्रपंचेनेति मिताक्षराकार आ
ह हारलताकारोपि अयं शौचसंकोचो होमाध्ययनार्थ एव न तु संध्यापंचमहायज्ञानैत्यकं स्मृतिकर्म च तन्मध्ये
हापयेत्तेषां दशाहान्ते पुनः क्रिया उभयत्र दशाहानि कुलस्यान्नं न भुज्यते दानम्प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्त
ते इति जाबालिवचनयमवचनाभ्यां प्रतिषिद्धानां संध्यापंचमहायज्ञमृत्तिकाग्रहणमार्जनप्राणायामतर्पणा
द्युपेतप्रधानक्रियारूपस्नानात्मकनैत्यककर्मस्मृतिकर्मकुलान्नभोजनदानप्रतिग्रहकाम्यहोमस्वाध्यायानामप्य

... ब्रह्मपुराणे। अन्यपू

र्वा गृहे यस्य भार्या स्यात्तस्य नित्यशः आशौचं सर्वकार्येषु गृहे भवति सर्वदा दानं प्रतिग्रहो होमः सर्वं तस्य वृथा
भवेत् गेहे इत्युपादानात् यस्य गृहकृत्यकारिणी अन्यपूर्वा भार्या भवति तस्य ब्राह्मणादेः सर्वस्य सर्वदाऽशौचं भ
वतीति एवमेव रत्नाकरादयः शंखः हीनवर्णा तु या नारी प्रमादात्प्रसवं व्रजेत् प्रसवे मरणे तज्जमशौचं नोपशा
म्यति हीनवर्णा शूद्रा प्रमादाद्ब्राह्मणादेस्तया कृतसंगात् ततोयमर्थः अपरिणीता शूद्रा यद्युत्तमवर्णेन रागकृत
संगमात् प्रसूता स्यात्तदा तत्प्रसवमरणयोः गर्भजनकस्य यावज्जीवमशौचमित्यर्थः अथाशौचसंकरः तत्र
कूर्मपुराणे अघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसी मरणोत्पत्तियोगेषु गरीयो मरणं भवेत् आद्यानामशौचा
नां विषमकालव्यापकानां यौगपद्ये एकस्मिन्नन्यपरोपनिपाते अधिकदिनव्यापकेनाशौचेनातीतेन शुद्धिर्ज्ञेया
अस्यापवादमाह मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति जननमरणाशौचसंकरे मरणाशौचमल्पकालव्या
पकमपि गरीयः तेन जननाशौचमध्ये मरणनिमित्तकसद्यः शौचाद्यशौचानां परोपनिपाते तेनैव जननाशौचं व्या
पतितेद्यात्सूतकात् शुद्धिरिष्यते अत ऊर्ध्वे द्वितीयात्तु सूतकांताच्छुचिः स्मृता एवमेव विचार्यं स्यात् मृतके मृतका

तत्रगारीयसैवव्यवस्थेति एवमेवरत्नाकरप्रभृतयः असंपूर्णाशौचानांसमकालव्यापकानांयौगपद्ये उत्तरेणै
वशुद्धिः पूर्वव्यवस्थायाः संपूर्णाशौचविषयत्वात् वर्द्धितेष्वहाशौचत्र्यहाशौचेसंपूर्णमशौचान्तरंयदिनिपत
तितदाद्याहत्र्यहयोर्लघुत्वात्गुरुतराग्निमाशौचापगमेनैवशुद्धिरितिप्रतिभाति देवलः परतः परतः शुद्धिरघवृ
द्धौविधीयतेस्याच्चेत्पंचतमादह्नः पूर्वेणाप्यनुशिष्यते अस्यार्थः एकस्मिन्नशौचेसतितच्छेषदिनासमाप्ताशौ
चान्तरोपनिपातेपंचतमादह्नः परतः परेणचेत्स्यादघवृद्धिस्तदापरतः परेणसंपूर्णाशौचेनानीतेनशुद्धिः पूर्वे
णाप्यनुशिष्यतइतिपंचतमादह्नः पूर्वेणतादृशाशौचान्तरोपनिपातेपूर्वेणैवाशौचेनापगतेनशुद्धिः एवञ्चतद्वाक्यं
ब्रह्मपुराणीयवाक्यसमानार्थमेवेतिमंतव्यम् कूर्मपुराणे अघवृद्धिमदाशौचमूर्ध्वंचेत्तेनशुद्ध्यति अथचेत्पंच
मीरात्रिमतीत्यपरतोभवेत् ऊर्ध्वंप्रथमाशौचादनंतरमघवृद्धिमदाशौचंभवति तदातेनप्रथमेनैवशुद्धिः अथचे
त्पंचमीरात्रिमतीत्यभवेत् तदापरतः परेणशुद्धिरित्यर्थः एवंचब्रह्मपुराणकूर्मपुराणदेवलवाक्यैकवाक्यतया
विष्णुवाक्यमपिसंपूर्णाशौचप्रथमार्धविषयंइत्यवसीयतेतदाहविष्णुः जननाशौचमध्येयद्यपरंजननंस्या
त्तदापूर्वाशौचव्यपगमेनशुद्धिः रात्रिशेषेदिनद्वयेन। प्रभातेदिनत्रयेण॥मरणाशौचमध्येज्ञातिमरणेप्येवं रात्रि

क्रमशौचान्तरं यदि भवति तदा पूर्वाशौचव्यपगमेन शुद्धिः। अग्निमाईं अग्निमाशौचव्यपगमेन शुद्धिः अशौचान्तदिने
अशौचान्तरोपनिपाते सर्वेषां तद्दिनानन्तरं दिनद्वयेन शुद्धिः अशौचान्तदिनशेषप्रभातकालेऽशौचान्तरोपनिपाते
अधिकेन दिनत्रयेण शुद्धिः त्र्यहाद्यसंपूर्णाशौचे समकालाशौचान्तरोपनिपाते अग्निमाशौचव्यपगमेन शुद्धिः सू
तकाभ्यन्तरे मरणोपनिपाते मरणे वा सति सूतकोपनिपाते मरणाशौचापगमेनैव शुद्धिः एषा च कुलप्रयुक्ताशौ
चे व्यवस्था यत्तु स्त्रीणां स्वप्रसवनिमित्तमशौचं तत्स्नातिस्विकं तदन्येन न वाध्यते तेन स्त्रीणां पतिमरणेपि पुत्रजन्म
नि विंशतिदिनेभ्य ऊर्ध्वं कन्याजन्मनि मा१दूर्ध्वं श्राद्धाद्यदृष्टार्थदृष्टार्थपाकादिकर्मणि चाधिकारः एवमेव प्रा
माणिकव्यवहारः अत्र पित्रादिमरणे अशौचान्तरोपनिपाते विशेषो दर्शितो हारलतामिताक्षराभ्यां स तु रत्नाकरा
दिषु दर्शनाभावादुपेक्षितः॥ अथ विदेशस्थाशौचं तत्र मनुः॥ विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं यच्छेषं दश
रात्रस्य तावदेवाशुचिर्भवेत् अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति य
द्दशमरणे तद्दिने वार्त्ता न प्राप्ता स विदेशः तत्र विगतं विनष्टं अनिर्दशमनतीतदशाहं यः पुरुषः शृणुयात्तस्य यच्छे
षमवशिष्टं तावदेवाशुचिर्भवेत् अतिक्रान्ते अतीते दशाहे त्रिरात्रमशुचिर्भवेत् संवत्सरे अतिक्रान्ते अपः स्पृ
[illegible] अत्र देशान्तरपरिभाषितं तत्र बृहस्पतिः देशान्तरं वदन्त्येके षष्टियोजनमायतं॥

मिता हरायानु पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् इति पठनात् ...
तेनु स्नात्वा द्रे वस्त्रोपवीतिना। अतीतेऽब्देऽपि कर्त्तव्यं प्रेतकार्यं यथाविधीति। संवत्सरादूर्ध्वमपि प्रेतकार्यमाशौचोदकदानादिकं कार्यम्। न पुनः स्नानमात्राच्छुद्धिरित्यर्थः।
पितृपत्न्यामपि भ्रातृव्यतिरिक्तायां स्मृत्यन्तरे विशेषो दर्शितः पितृपत्न्यामपेतायां मातृवर्ज्ये द्विजोत्तमः। संवत्सरे व्यतीतेऽपि त्रिरात्रमशुद्धिर्भवेदिति एवमेव गृह्यकारिकायाम् ६
त्वा पक्षिणी अशौचकालः पुरुषस्य भवति पक्षिणी आगामिवर्त्तमानदिनद्वयसहिता रात्रिस्तु त्यन या पूर्वापररात्रि
सहितदिनं वा देवलः अशौचाहः स्वतीतेषु बन्धुश्चेच्छ्रूयते मृतः तत्र त्रिरात्र याशौ त्रं भवेत् संवत्सरान्तरे ऊ
र्ध्वं संवत्सरार्द्धात्तु श्रूयते चेन्मृतः स्वकैः भवेदेकाहमेवात्र तच्च संन्यासिनां न तु नाशुच्यं प्रसवस्यास्ति व्यतीतेषु
दिनेष्वपि तत्र गोतमोक्तपक्षिणी संवत्सरार्द्धादूर्ध्वं व्यवतिष्ठते तन्न पूर्वे देवलेन त्रिरात्राभिधानात् देवलोक्त एकाह
स्तदुपरि मासत्रये व्यवतिष्ठते तदयं सर्वैक — वाक्यतयार्थः अनतीताशौचकालं यदि विदेशस्य सपिण्डमरणं।
श्रूयते तदा यावदवशिष्टमशौचकालस्य तावदाशौचं कर्त्तव्यं यदि तु संपूर्णाशौचस्य कालेऽतीते षण्मासाभ्यन्तरे स
पिण्डमरणं श्रूयते तदा त्रिरात्रं॥ तदूर्ध्वं नवमासपर्यन्तं पक्षिणी॥ तदूर्द्ध्वं वर्षं यावदेकमहोरात्रमशौचं॥ वर्षानन्तरं
स्नानमुदकदानं च॥ अहाशौचादावतीते सर्वदैव स्नानोदकदानमात्रं॥ जननाशौचकाले त्वतीते जननश्रवणे सर्व
दा अशौचाभावः अत्र पित्रादीनां विदेशस्थानां मरणश्रवणे मिताक्षराहारलताभ्यां विशेषोपलक्षितः स तु रत्नाक।
रादिभिरलिखितत्वादुपेक्षितः॥ महानद्याद्यव्यवहितदेशान्तरमृतस्य मरणश्रवणे सद्यः शौचं तथा च पैठीनसिः
देशान्तरमृतस्य सद्यः शौचं अत्र देशान्तरं परिभाषितं तत्र वृहस्पतिः देशान्तरं वदन्त्येके षष्टियोजनमाय

तरमृतस्त्वव्यवहारः गिरिर्वेतिवाशब्दः समुच्चये ततश्चायमर्थः षष्टियोजनानंतरोदेशोदेशांतरं षष्टियोजनाभ्यं
तरेपि यत्रभाषाभेदगिरिनदीव्यवधानानि भवंति तदपिदेशांतरं तस्मिन्देशांतरेमृतस्यसद्यः शौचं ॥ अथवालाद्य
शौचं तत्र याज्ञवल्क्यः आदंतजननात्सद्य आचूडान्नैशिकीस्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परं ॥ नैशि
की अशुद्धिः अहोरात्रमशौचमित्यर्थः अत्रदंतजननशब्देनदंतजन्मकालोलक्ष्यते सचसप्तमोमासः दंतजन्म
सप्तमेमासीत्युपनिषद्दर्शनात् चूडाशब्देनापिचूडाकालोलक्ष्यते सचतृतीयवर्षंतृतीयेवा अप्रतिहतइति
चूडाविधानात् अत्रयद्यपिसांवत्सरिकस्यचूडाकरणमितिप्रथमवर्षेविधानमप्यस्तितथापिविप्रैर्न्यूनैस्त्रि
भिर्वर्षैरित्यादिवाक्येनद्वितीयवर्षसमाप्तिंयावत् नैशिकीविधानात्तदेकवाक्यतयातृतीयाब्दएवगृह्यते ॥
चूडाकाल औत्सर्गिकस्तृतीयाब्दः प्रथमाब्देतुकुलधर्मवशादपवादतश्चूडाकरणमितिहारलता ॥ व्रतंउपन
यनंतेनापिस्वकालउपलक्ष्यते सचषड्वर्षानंतरएवकाल पर्यवसितः तच्चब्रह्मपुराणे ॥ द्विजन्मनामयं
काल स्त्रियाणांतुषडाब्दिकइतिसुव्यक्तमेवमर्यादायांचात्राङ ॥ तेनसप्तममासमवधीकृत्यबालमरणेसद्यः शौ
चं सप्तममासमारभ्यद्वितीयवर्षसमाप्तिंयावदेकाहोरात्रं। ततः षष्ठंवर्षंव्याप्यत्रिरात्रं ॥ तदनंतरंदशरात्रादिकं

-

रे त्रिरात्राभिधानं सच्छूद्रविषयं इत्यमेव हारलतारत्नाकरौ सच्छूद्रास्तु विशेषाशौचे पूर्वं दर्शिताः॥ यदपि अनूढा।
नां तु कन्यानां तथा वैश्य शूद्र जन्मनामिति शूद्रस्य त्रिरात्राभिधानं तदपि सच्छूद्रविषयमेव सामान्यतस्तु शूद्राणाम
ङ्गिरोवाक्येनैव व्यवस्था तद्यथा शूद्रे द्विवर्षान्मूने तु मृते शुद्धिस्तु पंचभिः अतऊर्द्ध्वं मृते शूद्रे द्वादशाहो विधीयते
षड्वर्षान्तमतीतस्तु शूद्रः संम्रियते यदि मासिकं तु भवेच्छौचमित्यांगिरसभाषिते एतत्षड्वर्षोपरि मासि
काशौचविधानं विवाहितशूद्रविषयं अविवाहितस्य षोडशवर्षं यावद्द्वादशाहः तदनंतरं मासिकमेवाशौचं॥ त
था च शंखः अनूढभार्य्यः शूद्रस्तु षोडशात्वत्सरात्परं मृत्युं समधिगच्छेच्चेन्मासं तस्यापि बांधवाः शुद्धिं समधिग
च्छंति नात्र कार्या विचारणा तदेषा समस्ता खंडलकेन व्यवस्था ब्राह्मणानां सप्तमासात्प्राक् बालके मृते सद्यःशौ
चं सप्तमासादारभ्य द्वितीयवर्षे समाप्तिं यावत् एकमहोरात्रमशौचात्तृतीयवर्षादारभ्य षड्वर्षान्तं यावत् त्रिरात्रं।
तदुपरि दशाहमशौचं भवति क्षत्रियाणां सप्तमासात्प्राक् सद्यःशौचं तदनंतरं द्वितीयवर्षान्तं यावद्द्व्यहं॥ तृतीयव
र्षादारभ्य षड्वर्षान्तं यावत्षडहः तदुपरि द्वादशाहमशौचं भवति॥ वैश्यानां सप्तमासात्प्राक् सद्यःशौचं तदनंत
रं द्वितीयवर्षान्तं यावत्त्र्यहं॥ तदुपरि षड्वर्षान्तं यावन्नवाहं॥ तदुपरि पंचदशाहमशौचं भवति। शूद्राणां सप्तमा।

वाक्प्रदानेकृतेतत्रज्ञेयंचोभयतस्त्र्यहं पितुर्वरस्यचततोदत्तानांभर्त्तुरेवहि स्वजात्युक्तमशौचंस्यात्सूतकेमृ
तकेपिवा अतःपरंकृतवाग्दानावस्थातः परंवृद्धानांप्राप्ताधिकरूपाणांइत्यर्थः अधिकरूपंव्यक्तीकरोतिवा
क्प्रदानेकृतइति उभयतइतिव्याकरोतिपितुर्वरस्यचेति वरस्यभर्त्तुरित्यर्थः ततोदत्तानांविधिपूर्वंदत्तानां
भर्त्तुरेवस्वजात्युक्तमशौचंभवतीत्यर्थः एवमेवहारलता। यत्रतुवाग्दानंनभवतितत्रचूडानंतरंविवाहपर्य्यन्त
मेकाहमेवाशौचंभवति तथाचयाज्ञवल्क्यः अहस्त्वदत्तकन्यासुबालेषुचविशोधनं अस्यार्थः अदत्तकन्या
सुमृतासुबालेषुचजातदंतेमृतेषु अहरेकमहोरात्रमशौचंभवति अयमत्रसमुदायार्थः सर्ववर्णानांद्विती
यवर्षान्तेयावत्कन्यामरणेसद्यःशौचंतदनंतरंविवाहपर्यन्तमेकाहोरात्रमशौचं विवाहानंतरंपितृकुलेअ
शौचंनभवति स्वामिकुलेसंपूर्णाशौचंभवति यत्रतुमयातुभ्यमेषादातव्येतिवाग्दानंक्रियतेतत्रचूडानंतरंमृतायां
तस्यांविवाहपर्यंतंपितृपतिपक्षयोरपित्रिरात्रमितिविशेषः विवाहितासुविशेषमाह ब्रह्मपुराणे दत्तानारीपि
तुर्गेहेसूयतेम्रियतेथवा स्वमशौचंचरेत्सम्यक्पृथक्स्थानेव्यवस्थिता तद्बन्धुवर्गस्त्वेकेनशुद्ध्येत्तुजनकस्त्रि
भिः अत्रजनकस्त्रिभिरितिजनकशब्देनजननकर्तृत्वोपलक्षणाज्जनन्याअपित्रिरात्रेणशुद्धिः तथाहिसिद्धव

त्रादीनामेकरात्रमेवाशौचंभवति॥तथापित्रादत्तानुयाकन्यास्वातंत्र्यादन्यमाश्रिता यंयंश्रितवतीभूयस्तस्य
शौचंत्र्यहंत्र्यहं मृतायांवाप्रसूतायांनान्येषामितिनिश्चयः कामादक्षतयोनिश्चेदन्यंगत्वाप्यवस्थितातस्या।
न्यस्यसगोत्रासायंत्वाश्रितवतीस्वयं अस्यार्थः विवाहितास्त्रीपाणिग्राहकादन्यंयंपुरुषमाश्रयतितस्यैवपु
रुषस्यतस्यांमृतायांप्रसूतायांवात्रिरात्रमशौचंभवति स्वयंग्राहककुलजातानामशौचंतत्रनभवति यदि
चपाणिग्राहकेणतस्याःसंगमःकृतस्तदातस्याःपाणिग्राहकगोत्रमेवतिष्ठतिस्वयंग्राहकगोत्रंनभवति यदि
तस्यास्तत्संगमोनवृत्तस्तदायमेवाश्रितवतीभवतितस्यैवान्यस्यान्यगोत्रस्यसगोत्रासाभवति अशौचंतत्रापि
त्र्यहमेवंतथा पदेतुसप्तमेयत्रबलात्कान्विद्धताभवेत् स्वामिगोत्रंभवेत्तस्यास्तच्चभूयोविशिष्यते॥पैतृकंत्वप्र
सूतायांततः पौर्विकभर्तृकं॥अस्यार्थः पाणिग्रहणेवृत्तेसमासेसप्तपदीसमारोहणेयाबलात् हृताअन्यमा।
श्रिताभावतितस्याःस्वामिगोत्रंपाणिग्राहगोत्रमेवभवति तत्रापिविशेषमाह तच्चभूयोविशिष्यते भूयःपुन
स्तद्गोत्रंविशिष्यतेविभज्यतेइत्यर्थः विभागमाहपैतृकंत्वप्रसूतायामित्यादि॥तस्याबलात्कारहृतायायाः
वत्प्रसवोनभवतितावत्पितृगोत्रमेवावतिष्ठते प्रसवानंतरंपौर्विकस्यभर्तुःपाणिग्राहकस्यैवगोत्रंभवति

च्छाचरणे सर्वाशित्वसर्वविक्रयित्वादिसति त्रिरात्रं एवमेव हारलता यदपि त्रिरात्राशौचं हारीतेनोक्तं जा
ते मृते मृते जाते वा कुलस्येति तदपि यथेच्छाचरणज्ञातिविषयमेव एवमेव रत्नाकरः जातमृत इति जन्मान
न्तरमव्यवहितकालमृत इत्यर्थः तदूर्ध्वं जातमरणे सर्वेषामेव सपिण्डानां सद्यःशौचं एवं च गर्भस्रावे सपि
ण्डानां गुणवतां सद्यःशौचं तदेष समुदायार्थः गर्भस्रावे मासत्रयाभ्यन्तरे ब्राह्मण्यास्त्रिरात्रं॥ मासत्रयोपरि
षण्मासं यावत् यावत्सु मासेष्वतीतेषु गर्भस्रावो भवति तावन्त्येव दिनान्यशौचं॥ षण्मासोपरि दशाहमशौचं
भवति॥ पतिपुत्रादिसपिण्डानां सद्यःशौचं भवति॥ क्षत्रियाया मासत्रयाभ्यन्तरे दिनचतुष्टयं॥ वैश्यायाः पं
चाहं॥ तदुपरि षण्मासं यावत् उभयोरपि अतीतमाससमसंख्यानि दिनानि॥ तदुपरि स्वजात्युक्तं द्वादशा
हं॥ पंचदशाहं चाशौचं भवति॥ शूद्राया मासत्रयं यावदष्टाहम् ततः षण्मासं यावत् अतीतमाससमसंख्या
नि दिनानि तदुपरि मासमशौचं भवति अत्र सर्वत्र निर्गुणसपिण्डानामेकाहे यथेच्छाचरणानां सपिण्डानां
त्र्यहाशौचं विज्ञेयं अथ मृत्युविशेषाशौचं प्रारभ्यते वृद्धगार्ग्यः वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रि
यः आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः तृतीये तूदकं कृत्वा

मरणप्रवृत्तानांदैववशात्तत्कालेजीवतांकालांतरेमृतानांत्रिरात्रमेवाशौचंतत्कालमरणेत्रिरात्रमित्यविवादा
मेव।वज्रानलहतेतथेति एतदप्येवंविधेषुप्रायश्चित्तेषुवज्रानलहतेषुत्रिरात्रमिति दर्शयति प्रायश्चित्तइतितु
कश्यपवाक्यैकवाक्यतयालभ्यते अंगिराः व्यापादयेदथात्मानंस्वयंयोग्न्युदकादिना विहितंतस्यनाशौचं
नाग्निनाप्युदकक्रियायस्तुरोषादिनाअग्न्यादिभिरात्मानंघातयति तस्याशौचाग्निदानादिक्रियानकर्त्तव्या अथ
कश्चित्प्रमादेनम्रियते। ग्न्युदकादिषु तस्याशौचंविधातव्यंकार्याचोस्योदकक्रिया प्रमादेनानवधानेनयोग्न्यु
दकवज्राद्यपमृत्युहेतुभिर्म्रियतेतस्यसंपूर्णमशौचंकर्त्तव्यं संकोचेप्रमाणाभावात् उदकक्रियाकर्त्तव्या ॥
।अग्निसंस्कारोदकदानादिकाःक्रियाः कर्त्तव्याइत्यर्थः उदकक्रियेत्यस्योपलक्षकत्वात् तदेवमत्रसमुदायार्थः
शौचाचमनाद्यसमर्थस्यवृद्धस्यअसाध्यव्याधिगृहीतस्यचपुरुषस्यमरणेच्छायामग्निजलप्रवेशेनम
रणेसपिण्डानांत्रिरात्रमशौचं तत्काले अग्न्यादिप्रवेशेपि अमृतानांपश्चान्मृतानांत्रिरात्रमशौचं रोषादि
नायेजलादिष्वात्मानंघातयंतितेषां अग्निदाहादिकंनकर्त्तव्यंतन्मरणंनिमित्तकमशौचमपिनकर्त्तव्यं
प्रमादेनअग्न्युदकवज्रादिनामरणेसंपूर्णमशौचंअग्निसंस्कारादिकाश्चक्रियाःकर्त्तव्याः॥सद्यःशौचा

विकल्पार्थश्चकारः यमः डिंबाशनिहतानां च तथैव प्राणसत्त्रिणां नदीश्वापददंष्ट्रिभ्यः सद्यःशौचं विधीयते प्राणसत्त्रिणामि-
ति परार्थे प्राणत्यागिनामित्यर्थः नदीति जलाशयोपलक्षणं श्वापदा नखायुधास्तर —— क्षुरक्षादयः दंष्ट्रिणो दशना
युधाः सर्पवराहादयः एतत्त्रयादिमरणे सद्यःशौचं मरणांतिकप्रायश्चित्ते काम्ये च त्रिवेणीसंगमादौ मरणे सद्यःशौ
चानुवृत्तौ शंखलिखितौ अथशस्त्रानाशकाग्निरज्जुभृगुजलप्रमापणेष्वेवमेव अनाशकमभोजनं एतदपि सद्यःशौ
चं काम्ये प्रयागादौ शस्त्रादिना रणे प्रायश्चित्ते च मरणांतिके ज्ञेयं नदर्यं सद्यःशौचादि वोधकसमस्तारखंडलकार्थः संम
ईहतानां शस्त्रशून्यकलहमृतानां राज्ञाहतानां गोब्रह्मणार्थे जलपंकादिभग्नानां संग्रामे शस्त्रसन्मुखहतानां मरणांति
के काम्ये कर्मणि प्रयागादौ प्रायश्चित्ते च शस्त्रजलाग्निश्वपदादिभिर्मृतानां च सद्यःशौचं सकलस्यापि राजाज्ञया सद्यः
शौचं ब्राह्मणार्थे च गवार्थे च दण्डेन विपन्नानां संग्रामे च दंडेन विपन्नानां वेदीकृतानां मृतानामेकाहोरात्रमशौचं लगुड
संग्रामे पराङ्मुखहतस्य त्रिरात्रमशौचं पराशरः उपसर्गमृते चैव सद्यःशौचं विधीयते एतच्च प्रचुरोपसर्गोपद्रवसन्नि
पातविषयमिति प्रतिभाति उपसर्गमरणे संपूर्णाशौचस्य प्रामाणिकव्यवहारविषयत्वात् तथा च आपद्यपि सकाष्ठा
यामित्यत्र सद्यःशौचे ऽस्य — त्तदुर्भिक्षे औपसर्गिकात्यंतमकरादिपीडायां च नाशौचमिति हारलताकार आह स्मंतथा

तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः। दिवारात्रमहोरात्रमित्यर्थः एतच्चाहोरात्राशौचं शिष्यस्य निवृत्ताध्ययन-
स्याचार्यपत्नीपुत्रयोर्मरणे ज्ञेयं अधीयानस्य तु तयोरपि मरणे त्रिरात्रं गौतमोक्तं बृहस्पतिः अहं मातामहाचार्य-
श्रोत्रियेष्वशुचिर्नरः मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च अश्रोत्रियेत्वहः कृत्स्नमनूचाने तथा गुरौ मृते राज
नि सज्योतिर्यस्य स्याद्विषये स्थितिः श्रोत्रिय एकशाखाध्येता एकां शाखामधीत्य श्रोत्रिय इति बौधायनवचनात् तस्मि
न्स्वगृहे मृते स्वगृहपतेः त्रिरात्रमशौचं तथा चाङ्गिराः गृहे यस्य मृतः कश्चिदसपिंडः कथंचन तस्याप्यशौचं वि-
ज्ञेयं त्रिरात्रमिति निश्चयः अत्रासपिण्डः श्रोत्रियः अश्रोत्रिये त्वसपिण्डे स्ववेश्मनि मृते एकाहोरात्रं तथा चैकरात्र
मित्यनुवृत्तौ विष्णुः असपिण्डे स्ववेश्मनि मृत इति अत्रासपिण्डोऽश्रोत्रियः मातुले पक्षिणीति मातुः सहोदरे भ्रात-
रि शिष्येपि गुरुकुलान्निवृत्ताध्ययने मृते पक्षिणीति उपनीय वेदैकदेशमध्यापिते ऽनुपनीय संपूर्णं वेदमध्यापिते
च स्वगृहे मृते शिष्ये आचार्यस्य पक्षिणी। ऋत्विजि मृते यजमानस्य पक्षिणी बान्धवो मातृष्वस्रेयादिर्वक्ष्यते तन्म
रणेपि पक्षिणी पक्षिणी तु पूर्वापरदिनसहिता रात्रिः पूर्वापररात्रिसहितं दिनं वा अश्रोत्रिये इत्यादि अश्रोत्रिये
च स्वगृहे मृते ऽहः कृत्स्नमहोरात्रं व्याप्य अनूचानः साङ्गवेदाध्येता तस्मिन्नेकग्रामे मृते गुरौ अल्पाध्यापके मृत ए

निमृते एकाहः बौधायनः त्रिरात्रमहोरात्रमेकरात्रमिति कुर्वीत आचार्योपाध्यायतत्पुत्रेषु त्रिरात्रमृत्विजामपि शिष्यसतीर्थसब्रह्म
चारिषु त्रिरात्रमहोरात्रमेकरात्रमिति कुर्वीत यथासंख्यमन्वयः उपाध्यायोऽत्र यत्किंचिदध्यापकः ऋत्विजां चेति समस्यार्थे
षष्ठी ऋत्विक्षु मृतेष्वित्यर्थः एतच्च यजमानगृह एव मृतेषु त्रिरा — त्रं यजमानस्येति ज्ञेयं शिष्येपि गुरुकुलमृते त्रि।
रात्रं। सतीर्थः समानगुरुः। सब्रह्मचारी समानाचार्य्यः। एकरात्रपदमुभयत्र दिनमात्रे रात्रिमात्रे वा लक्षयति शुद्धोदि
त्यनुवृत्तौ विष्णुः आचार्य्यमातामहेऽतीते त्रिरात्रेण अनौरसेषु पुत्रेषु जातेषु च मृतेषु च परपूर्वासु भार्यासु प्रसूतासु
मृतासु च आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वाशुर्य्यसहाध्यायिशिष्येषु चैकरात्रेण स्वदेशराजनि च
॥ औरसेषु औरसं वर्ज्जयित्वा एकादशविधपुत्रेषु जातेषु मृतेषु च त्रिरात्रं। परपूर्वासु पूर्वंपर परिगृहीतासु भा
र्यासु त्रिरात्रं अत्र यद्यपीदं त्रिरात्राभिधानं त्रैवर्णिकविषयमिति रत्नाकरशुद्धिविवेकयोर्व्याख्यानं तथापि विशेषा
नभिधानात् सर्ववर्णविषयतया सर्वप्रामाणिकानुमतत्वाच्चातुर्वर्ण्यसाधारणमेव विज्ञेयं हारलतादिष्वपि विशेषानो
क्तः आचार्य्यशब्दः पत्नीपुत्रयोर्विशेषणं उपाध्यायो यत् किंचिदध्यापकः। मातुलादयः प्रसिद्धाः सहाध्यापी वेदै
कदेशे सहाध्येता संपूर्णवेदे सहाध्यायी निवृत्ताध्ययनः स्वशिष्यो अन्योपनीतो वेदभागमध्यापितः स्वदेशराज स्वकर्म्म

चभार्य्यासु अनौरसेषुपुत्रेषुच यत्प्रतियोगिकंभार्य्यात्वं यत्प्रतियोगिकंचपुत्रत्वंतस्यैवत्र्यहाशौचं भार्य्यापुत्रश-
व्दयोः संबन्धिशव्दत्वात् सपिण्डानांत्वशौचाभावः अतएवमिताक्षरायां प्रजापतिः। अन्याश्रितेषु दारेषु परपत्नीसुते-
षुच। गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैवतत्पिता। तदयंसमस्तप्रकरणार्थः सपिंडमरणे दशरात्रं। अष्टमपुरुषा
दारभ्य दशमपुरुषंयावत् सकुल्यमरणेत्रिरात्रं। ततूर्ध्वं ज्ञायमाननामजन्मपरं पराके ज्ञातिमरणेपक्षिणी अज्ञायमा
ननामजन्मपरंपराके अस्म द्गोत्र इत्येवमाकारमात्रज्ञानगोचरे मृते स्नानमात्रं। आचार्य्यमरणेतत्संस्कारकर्त्तुः शि
ष्यस्य दशरात्रं। यदिसंस्कारंनकरोतितदाशिष्यस्यत्रिरात्रं। आचार्य्यपत्नीमरणे आचार्य्यपुत्रमरणे चगुरुकुलस्थित-
स्यशिष्यस्यत्रिरात्रं। स्वगृहस्थितशिष्यस्यतयोर्म्मरणे एकरात्रं। उपनीय किंचिद्वेदाध्यापके ऽनुपनीयसंपूर्णवेदा-
ध्यापकेचगुरौमृतेपक्षिणी। तथाविधगुरुपत्न्यांचमृतायांपक्षिणी। यत्किंचिदध्यापके उपाध्यायेमृते एकरात्रं। उ
पाध्यायपत्न्यांचमृतायामेकरात्रं। उपाध्यायपुत्रेचमृते एकंदिनमात्रंरात्रिमात्रंवा। आचार्य्यगृहस्थितशिष्यमरणे
आचार्य्यस्यत्रिरात्रं। उपनीयवेदैकदेशमध्यापितस्य अनुपनीयसंपूर्णशाखामध्यापितस्यचशिष्यस्यमरणेगुरोः
पक्षिणीवेदे यत्किंचिदध्यापितस्यशिष्यस्यमरणे उपाध्यायस्य एकाहोरात्रं वेदेसहाध्यायिनिमृतेऽनरस्यसमानव्रह्म

त्रिरात्रं तत्सपिण्डानां तयोर्मरणे एकरात्रमशौचं भवति हीनवर्णागामिनीषु भार्यासु त्वशौचाभावः। अथ निर्हारा
द्यशौचं अङ्गिराः यः कश्चिन्निर्हरेत्प्रेतमसपिण्डः कथञ्चन स्नात्वा सचैलः स्पृष्ट्वाग्निं तस्मिन्नेवाह्नि शुद्ध्यति
।निर्हरेत् बहिर्नयेत् इदं च धर्मबुध्याऽनाथप्रेतवहने शौच पराशरः अनाथं ब्राह्मणं प्रेतं ये हरन्ति द्विजातयः
पदे पदे यज्ञफलमानुपूर्व्यात्प्रुवन्ति ते न तेषामशुभं किंचित्पापं वा शुभकर्मणां जलावगाहनात्तेषां सद्यः शौ
चं विधीयते प्रेतसंस्पर्शसंस्कारैर्ब्राह्मणो नैव दुष्यति बोढा चाप्यग्निदाता च सद्यः स्नात्वा शुचिर्भवेत् स।
स्कारोऽत्र प्रेतप्रसाधनं अग्निदानस्य पृथगुपादानात् पैठीनसिः असंबन्धिद्विजान् वहित्वा दहित्वा च।
सद्यःशौचं संबंधे त्रिरात्रं इदागमोऽत्र छादसः।सद्यःशौचं धर्मबुध्या दाहादौ। संबंधे सति त्रिरात्रं। मातु
लमातृष्वस्रादीनां येषां मरणे अशौचमुक्तं तेषां दाहादौ त्रिरात्रमशौचं तेन च मातुलादयो व्यवस्थायां लि
ख्यते मनुः अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति ज्ञात्य।
नगमने अग्निस्पर्शघृतप्राशनमात्रमधिकं विधीयते अशौचं तु यथोक्तमेव कूर्मपुराणे असपिंडं द्वि
जं प्रेतं विप्रो निर्हृत्य बंधुवत् अशित्वा च सहोषित्वा दशरात्रेण शुद्ध्यति। यद्यन्नमत्ति तेषां तु त्रिरात्रेण ततः शुचिः। अनदन्नन्नम

र्बकं प्राप्य हि कान्नदायकानामामात्रे दोषाभावः सिद्धान्ते तु भुंक्ते दोष एव तत्र त्रिरात्रं दुग्धमात्रपानं प्रायश्चित्तं प
यः पदं दुग्धपरमिति हारलता अशौचं तु न तज्जातयुक्तमेवाशौचान्नभोजने वा कांतरोक्तं कूर्मपुराणे दशाहे
न शवस्पर्शे सपिण्डस्तु विशुद्ध्यति यदि निर्दहति प्रेतं प्रलोभाक्रान्तचेतनः दशाहेन द्विजः शुद्ध्येद् द्वादशाहेन
भूमिपः अर्द्धमासेन वैश्यस्तु शूद्रो मासेन शुद्ध्यति षड्रात्रेणाथवा शुद्धिस्त्रिरात्रेणाथवा पुनः अत्र च षड्रात्र
मशौचं आपत्काले मूल्येन दाहे कृते असंतापत्काले दाहे कृते त्रिरात्रमिति विभागः मनुः अवरश्चेद्वरं वर्णमवरं वा
वरो यदि अशौचे संस्पृशेत्स्नेहात्तस्याशौचेन शुद्ध्यति अवरो हीनजातिः। वरः उत्कृष्टजातिः। स यदि स्पृशेद्द
हनवहनार्थेन सशवस्य यज्जातीयशवस्तज्जातियुक्तेनाशौचेनाशौचकालेन शुद्ध्यतीत्यर्थः पराशरः प्रेतीभूतं तु
यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् याज्ञवल्क्यः ब्राह्मणेनानुगन्तव्यो न
तु शूद्रः कथंचन अनुगम्याम्भसि स्नात्वा अग्निं स्पृष्ट्वा घृतभुक् शुचिः इदं च सर्वथा शूद्रानुगमने निषेधे स
नि यदि तु कार्यान्तरेणापि शवशूद्रानुगमनमवर्जनीयं भवति तदा स्नानादिना शुद्धिः ब्रह्मपुराणे योऽसवर्णं
तु मूल्येन नीत्वा चैव दहेन्नरः अशौचं तु भवेत्तस्य प्रेतजातिसमं नृप सर्वे वर्णाः सजातीयं दग्ध्वा त्र्यहमशौचि

नुगमने स्नानानंतरमग्निस्पर्शनघृतप्राशने कृत्वा शुद्धिः। यदि घृतप्राशनेन भवति तदा नमहोरात्रं व्याप्य शुद्धिः॥
उदासीनस्य स्नेहेन दाहादौ कृते एकरात्रमशौचं। मातुलमातृष्वस्रेयपैतृष्वस्रेयमातुलपुत्रमातुलानीमातृष्व-
सृपैतृष्वसृभगिनीभागिनेयमातामहमातामहीदौहित्रभगिनीपतिजामातृश्वशुरश्वश्रूश्यालकशिष्याचार्याचा-
र्यपुत्राचार्यपत्नीगुरुपत्नीगुरुपुत्रयाज्यऋत्विग्मातुर्मातुलमातुर्मातृष्वस्रेयमातुःपैतृष्वस्रेयमातुर्मातृष्वसृ:
मातुःपितृष्वसृमातुर्मातुलपुत्राणां दाहादौ कृते त्रिरात्रं। दाहादि कृत्वा मृतसंबंधिगृहे यो वसति तत्सिद्धान्नं च भु-
क्ते तस्य मृतजात्युक्तमशौचं। यस्तु मृतसंबन्धिगृहे वसति न तदन्नं भुंक्ते यो वा तदन्नं भुंक्ते न तद्गृहे वसति तस्य त्रिरा-
त्रमशौचं। यो बुद्धिपूर्वकं यस्याशौचे अन्नमश्नाति तस्य तदशौचं समानमेवाशौचं शेषे च स्नानं। प्रमादतोऽशौच्य-
न्नभोजने दोषाभावः। दुर्भिक्षे बुद्धिपूर्वकमपि यावदशौच्यन्नमश्नाति तावदेवाशौचं। अशौचापगमानंतरं त्रि-
रात्रं दुग्धपानरूपं प्रायश्चित्तं। मूल्येन प्रेतदहनवहनयोः कृतयोर्दातृजात्युक्तमशौचं। अशौचिभिः सह शयना-
सनालिंगनांगसंवाहनानि कृत्वा तज्जात्युक्ताशौचं शिष्यस्य गुरूपाध्यायाचार्यदाहे मूल्येन परद्वारा कारिते दशरात्रम-
शौचं। ब्रह्मचारिणः पित्रादिदाहं स्वयं कृत्वा एकरात्रं। क्षत्रियादीनां चानुवर्णानुगमने अहोरात्रं। ब्राह्मणस्य क्षत्रि-

द्व्यहः क्षत्रविशोः एकाहः शूद्रस्य पूर्वोक्तः। कूर्मपुराणे अस्थिसंचयनादर्वागेकाहं क्षत्रवैश्ययोः अन्यथा चैव स
ज्योतिर्ब्राह्मणे स्नानमेव च। इदमेकाहविधानं गुणवत् क्षत्रवैश्ययोः मृतयोरश्रुपातने विप्रस्य। गुणहीनयोस्तयो
र्मरणे अश्रुपातने द्वितीयेहनि पूर्णे संध्यापर्यन्तेन ब्राह्मणः शुद्ध्यति अनस्थिसंचयादित्यादि वाक्येन पूर्वोक्तेन
अन्यथेति अस्थिसंचयने कृते सज्योतिर्यदि दिवा अश्रुपातनं तदा दिनांतेन यदि रात्रौ तदा रात्र्यंतेन शुद्धिरित्य
र्थः शुद्ध्येदित्यनुवृत्तौ विष्णुः सर्वस्यैव प्रेतस्य बांधवैः सहाश्रुपाते कृते स्नानेनाकृते अस्थिसंचयने सचैलस्ना
नेनाचमनेन च विप्रस्य शुद्धिः इदं तद्गृहगमनाभावपक्षे ज्ञेयं तदयं प्रकरणार्थः असपिण्डे मृते ब्राह्मणे तद्गृहे
गत्वा तद्बन्धुभिः सहाश्रुपातमस्थिसंचयनात्पूर्वं कृत्वा सचैलस्नानेनाचमनेन च शुद्धिर्ब्राह्मणस्य। अस्थिसं
चयनानन्तरं स्नानमात्रेण। क्षत्रिये मृते अस्थिसंचयनात्पूर्वं रोदने विप्रस्य द्व्यहेन वैश्ये पि द्व्यहेन। अस्थिसंच
यनादूर्ध्वं क्षत्रियवैश्ये च दिनमात्रं रात्रिमात्रं वा। शूद्रे मृते अस्थिसंचयात्पूर्वं रोदने विप्रस्य त्रिरात्रम्। अ
स्थिसंचये एकाहोरात्रं। क्षत्रिये वैश्ये च मृते अस्थिसंचयात्पूर्वं क्षत्रियवैश्ययोरश्रुपाते सचैलस्नानं। अ
स्थिसंचयानंतरं स्नानमात्रं। शूद्रे मृते क्षत्रियवैश्ययोरस्थिसंचयनात्पूर्वं द्व्यहेन तदनंतरं दिनमात्रेण रात्रि

यतः तत्यजेत्सूतके कर्म ब्रह्मचारी स्वयं क्वचित् न दीक्षणात्परं यज्ञेन कृच्छ्रादितपश्चरन्। पितर्य्यपि मृ
ते नैषां दोषो भवति कर्हिचित् अशौचं कर्मणो न्ते स्यात् त्र्यहं वा ब्रह्मचारिणः। सूतक इति मृतकस्याप्युपलक्षणं
ब्रह्मचारी सूतके अशौचे स्वकर्म ब्रह्मचर्याश्रमविहितं न त्यजेत् यज्ञे दीक्षणात्परं दीक्षणीयेष्टेरनंतरमशौचे स
ति स्वकं कर्म न त्यजेत् याज्ञिकः दीक्षणात्पूर्वं त्वशौचे वृत्ते यज्ञेप्यशौचं भवति एतत् एवेत्यर्थः। तपस्वी कृच्छ्रादि
तपश्चरन् स्वकं कर्म न त्यजेत् एतदप्यशौचाभावविधानं न तत्कर्मविषयमेव कर्मान्तरे त्वशौचमेव एषां कर्म
णोन्ते ब्रह्मचर्य्यदीक्षातपोरूपस्यान्ते अवसाने स्वजात्युक्तमशौचं भवति ब्रह्मचारिणः पुनः पित्रोरपि मर
णे व्रतचर्यावसाने त्र्यहमेवाशौचं भवति यदाह मनुः आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् समाप्ते
तूदकं कुर्यात्त्रिरात्रमशुचिर्भवेत् आदिष्टमादेशो गुरोर्मा दिवा सुषुप्था इत्यादिको अस्यास्तीत्यादिष्टी ब्रह्मचा
री॥ ब्रह्मपुराणे गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः पश्चादशौचे पतिते न भवेदिति निश्चयः एवं च
मधुपर्कग्रहणात् पूर्वमशौचापतिपाते अशौचं भवत्येवेत्यर्थः तथा गृहीतनियमस्यापि नस्याद
न्यस्य कस्यचित् निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि तथा नैष्ठिकस्याथवान्यस्याभिसार्थे प्रस्थिते।

सूतकेसतिचांतराशेषमंत्रपरैर्दद्याद्दातृभोक्तृश्चनस्पृश्येत् परैर्दद्यादिति विवाहेयज्ञेचप्रवर्त्तमानेमध्येसूत।
केमृतकेचपतिते शेषमंत्रपरैः परद्वारादापयेत् एवंसतिदातृन् भोक्तृनृनस्पृशेद्दोषइतिशेषः तथादानेविवा
हेयज्ञेचसंग्रामेदेशविप्लवे आपद्यपिचकष्टायांसद्यःशौचंविधीयते। दानेतुलापुरुषदानादौ। विवाहेचा
रब्धे। देशविप्लवेराष्ट्रभङ्गेचाशौचाभावः। संग्रामेमृतस्यान्येषांसद्यःशौचंभवतिकष्टायामापदिग्रासाभावेनप्रा
णनाशेसंभाव्यमानेप्रतिग्रहेकर्त्तव्येसूतकंनभवतीत्यर्थः यमः दैवभयेसमुत्पन्नेप्रधानाङ्गेविनाशिते पूर्व
संकल्पितेचार्थेतस्मिन्नाशौचमिष्यते। दैवभयेदुर्भिक्षोपसर्गमरणादौजातेप्रधानांगेनृपतौ परचक्रेणना
शिते। राष्ट्रोपप्लवेसत्यशौचंस्वस्वजात्युक्तंनभवतीत्यर्थः। पूर्वसंकल्पितंयत्किंचित्पुष्करिण्यादिधर्मकार्यमशौ
चात् पूर्वमारब्धंतत्रसर्वत्रजननेमरणेसत्यशौचंनभवतीत्यर्थः अत्रचसमस्तएवप्रकरणेतत्तत्कार्यविशेष
एवाशौचाभावोनसर्वकार्येअशौचाभावइत्यवधातव्यम्॥ इतिरुद्रधरकृतौशुद्धिविवेकेजननमरणयोःशु
द्धिपरिच्छेदः॥ ॥अथाधिकारिणः तत्रमरीचिः मृतेपितरिपुत्रेणक्रियाःकार्याःप्रयत्नतः बहवःस्युर्यदापु
त्राःपितुरेकत्रवासिनः सर्वेषान्तुमतंकृत्वाज्येष्ठेनैकेनयत्कृतम् द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत्॥

तैरित्यर्थः उच्छिन्नाबन्धवो यस्य स उच्छिन्नबन्धुस्तस्य रिक्थात् धनात् ल्यब्लोपे पंचमी तेन सर्वबन्धुहीनस्य
धनप्रदायकस्मै चित् तद्द्वारा तदौर्ध्वदैहिकं कारयेदित्यर्थः तथा पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः स्मृताः
त्रिप्रकाराः क्रियाश्चैतास्तासां भेदान् शृणुष्व मे आदाहाद्या यायुधादिस्पर्शाद्यन्ताश्च याः क्रियाः ताः पूर्वाः। मध्यमामा
सिमास्येकोद्दिष्टसंज्ञकाः प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु क्रियन्ते याः क्रियाः पित्रोः प्रोच्यन्ते ता नृपोत्त।
माः तत्र विभागमाह स एव। पितृमातृसपिण्डैस्तु समानसलिलैस्तथा सङ्घातान्तर्गतैर्वापि राज्ञा वा धनहारि
णा पूर्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा मृताहनि च कर्त्तव्याः स्त्री
णामप्युत्तराः क्रियाः प्रतिसंवत्सरं यावत् एकोद्दिष्टविधानतः अत्र पितृमातृसपिण्डादयः पूर्वाक्रियां कुर्युः।
नोत्तरां। मध्यमक्रियायां त्वेषामनियमः पुत्राद्या भ्रातृसंततिपर्यन्ता एवोत्तरक्रियायामधिकारिणः। दौहित्रैरि।
ति। पुत्रिकापुत्रविषयकमिति कल्पतरुः गौतमः पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्या वा दद्युः तदभावे ऋ
त्विगाचार्यौ। एतच्च भ्रात्राद्यभावे सति द्रष्टव्यं। तथा च प्रचेताः पुत्रो भ्राता पिता वापि मातुलो गुरुरेव च एते पिंड
प्रदा ज्ञेयाः सगोत्राश्चैव बान्धवाः भ्रातेत्यविशेषोपदानात् कानिष्ठ्यमत्र विवक्षितम् तेन पत्न्यभावे कनिष्ठभ्रा

पिनभवतितत्रापितृवत् यथापितापुत्रस्यश्राद्धादिकंकरोति तथाऽसपिंडोपिगुरुरशौचादिकंकृत्वाश्राद्धं
कुर्य्यात् तथात्रयाणमाश्रमाणांचकुर्य्योद्दाहादिकांक्रियां यतेःकिञ्चिन्नकर्त्तव्यंनचान्येषांकरोतिसः तथा
भ्रातुर्भ्रातास्वयंचकैतद्भार्याचेन्नविद्यते तस्यभ्रातृसुतश्चैकेयस्यनास्तिसहोदरः अत्रसहोदराभावेभ्रा
तृपुत्रस्याधिकारबोधनात् बहूनामेकजातानांयद्येकःपुत्रवान्भवेत् सर्वेतेनैवपुत्रेणपुत्रिणोमनुरब्र
वीत् इतिमनुवचनंपितृव्यादीनांपुत्रित्वातिदेशकत्वंतुभ्रातृपुत्रस्यपुत्रत्वातिदेशकमितिव्यक्तमेवप्रती
यते अन्यथापुत्रत्वाद्भ्रातृपुत्रस्यैवाधिकारःस्यात् यावद्वचनंहिवाचनिकमितिन्यायाच्चभ्रातृपुत्रस्यपुत्रत्वाति
देशकत्वमनुवचनमित्यवसीयते एवंचैतत्तुल्यतयाबह्वीनामेकपत्नीनामेकाचेत्पुत्रिणीभवेत्। सर्वास्तेनैवपु
त्रेणपुत्रिण्योमनुरब्रवीत् इत्यतिदेशेसत्यपिसपत्नीपुत्रे — पत्युरेवाधिकारः नचैवंपितृव्यानांसपत्नीमातु
श्चपुत्रित्वातिदेशेकिंफलमितिवाच्यम् पुत्रित्वातिदेशेनपुन्नामनरकगमनाभावस्यसपत्नीमातुश्चपुत्रित्व
सपिण्डनसंभवस्यचफलस्यविद्यमानत्वात् तथादत्तानांचाप्यदत्तानांकन्यानांकुरुतेपिता चतुर्थेहनिता
स्तेषांकुर्वीरन्सुसमाहिताः दत्तानांवाग्दत्तानामित्यर्थः मातामहतोदौहित्राःकुर्वन्त्यहनिचापरे तेपितेषांप्र

यापुत्रीसापिपिंडप्रदाभवेत् तस्यपिंडान्दर्शेनानुवाएकाहेनैवनिःक्षिपेदित्यादिवाक्यानिपुत्राभावेदुहितुरधि
कारबोधकानीतिरत्नाकरेव्यवस्थापितंतच्चमिश्राद्युकल्पतरुस्मृतिसारकृतोर्नानुमतं ताभ्यांसिद्धवत्पुत्राभावेप
त्न्यास्तदभावेसहोदरस्येत्येवमेवलिखनात् व्यवहारोपितदुभयानुसारी अतोव्यवहारानुरोधेनरत्नाकरलि
खितमप्युपेक्षितं अत्रचापुत्रस्यचयापुत्रीसादिवाक्यानिसपिण्डाद्यभावेदुहित्रधिकारबोधकानीतिव्यवस्था
पयितव्यं यत्रतुव्यवहारविरोधोनापद्यतेतत्रयथारत्नाकरमेवव्यवस्था मार्कण्डेयपुराणे स्त्रीणामप्येवमे
वैतदेकोद्दिष्टमुदाहृतं सपिंडीकरणंतासांपुत्राभावेनविद्यते प्रतिसंवत्सरंकार्यमेकोद्दिष्टंनरैः स्त्रियःमृताह
नियथान्यायंनृणांयद्वदिहोदितं स्त्रीणामप्येवेति यादृशेनसंबन्धेनपितृव्यत्वादिनापुरुषाणामेकादशाहा
दितादृशेनसंबन्धेन पितृव्यपत्नीत्वादिनास्त्रीणामपितत्कार्यमित्यर्थः तदेषप्रकरणार्थः मृतस्यत्रिविधाक्रि
याभवति पूर्वामध्यमाउत्तराचेति तत्रदाहमारभ्याशौचांतंयावत् पिंडदानादिकाक्रियापूर्वाक्रिया अशौचा
पगमानंतरमेकादशाहादिसपिंडनपर्यन्तामध्यमा तदूर्ध्वमेकोद्दिष्टरूपाउत्तरा तत्रत्रयोदशविधानामपिपु
त्राणांत्रिविधासुक्रियास्वधिकारः तेषुचौरसःश्रेष्ठः तदभावेपुत्रिकापुत्रः ततःपूर्वपूर्वाभावेउत्तरोत्तरोधिकारी

-

कारी।तदभावेपतिः।तदभावेसपत्नीपुत्रः।तदभावेस्नुषातदभावेपौत्रः।तदभावेप्रपौत्रः।तदभावेसपिंडाः।त
दभावेसकुल्याः।तदभावेपितृसपिंडा इतिश्राद्धमंजरी।शूद्रस्यापरिणीतस्यद्विवर्षादूर्ध्वंपूर्वेक्रियामात्रम्।
तत्रभ्रात्रादिरधिकारी।परिणीतस्यत्रिविधाक्रियातत्रपुत्रादिरधिकारीपूर्ववत्।केचित्तुअसममासषड्वर्ष
स्यत्रैवर्णिकस्यस्त्रीशूद्रयोश्चापरिणीतयोस्त्रिविधापिक्रिया।अनुग्रहादिना।नत्वावश्यकीत्याहुरिति।श्रा
द्धकस्यस्मृतिसारे।गुरुकुलस्थितस्यशिष्यस्यभ्रातृपित्राभावेगुरुरधिकारी गुरोरपिपुत्रपत्नीभ्रातृहीन=
स्यशिष्यः यजमानस्यान्याभावेऋत्विगिति॥अथानधिकारिणः।तत्रयाज्ञवल्क्यः नब्रह्मचारिणःकुर्यु
रुदकंपतितानांच पाखण्डमाश्रितास्तेनानव्रात्यानविकर्मिणः गर्भभर्तृद्रुहश्चैवसुराप्यश्चैवयोषितः।
उदकशब्देनात्रप्रकरणादाहादिकमपिलक्ष्यतेसाहचर्यात्।पाखण्डावेदप्रामाण्यास्वीकर्त्ता।स्तेना अत्रब्रा
ह्मणसुवर्णातिरिक्तविषयकचौर्यकृतयः।ब्राह्मणसुवर्णहारिणःपतितत्वेनैवग्रहणात्।व्रात्याःस्वस्वो
पनयनकालेऽकृतोपनयनाः।विकर्मिणःआलस्याच्छ्रद्धयाचास्वकर्मत्यागिनोनिंदितकर्मकर्तारश्च॥
सुराप्यइतिमद्यपायिकाः एतच्चत्रैवर्णिस्त्रीविषयं एतेब्रह्मचारीप्रभृतयोऽन्यस्योदकंनकुर्योः मनुःआदि

रसलक्षणं तत्र विष्णुः अथ द्वादश पुत्रा भवन्ति स्वे क्षेत्रे स्वयमुत्पादितः प्रथमपुत्रः मनुः संस्कृतायां च भा
र्यायां स्वयमुत्पादयेत्तु यम् तमौरसं विजानीयात्पुत्रं प्रथमकल्पितं देवलः सवर्णायां संस्कृतायां स्व य
मुत्पादितमौरसं पुत्रं विद्यादिति सवर्णा समानवर्णा अत्र सावर्ण्यं द्विजातित्वेन विवक्षितं यदि ब्राह्मणा
त्वादिनैव सावर्ण्यं विवक्षितं स्यात्तदा ब्राह्मणस्य विवाहितयोः क्षत्रियावैश्ययोः स्वयमुत्पादितः सुत
औरसो न स्यात् पुत्रान्तरेषु तस्यान्तर्भावो नास्त्येव अतस्तस्यौरसत्वमेव ततः शूद्रामात्रत्यागाय सवर्णग्रह
णमिति पारिजातः अयमर्थः विवाहितासु ब्राह्मणक्षत्रियवैश्यजातीयासु भार्यासु स्वयमुत्पादितः पुत्र औ
रसः अथ क्षेत्रजलक्षणम् विष्णुः नियुक्तायां सपिण्डेनोत्तमवर्णेनोत्पादितः क्षेत्रजो द्वितीयः मनुः यस्त
ल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा स्वधर्मेण नियुक्तायां स ज्ञेयः क्षेत्रजः सुतः तल्पं कलत्रम् तत्रजा
तः प्रमीतस्य मृतस्य क्लीबस्य नपुंसकस्य व्याधितस्य अपत्योत्पादनप्रतिबन्धकदुश्चिकित्सरोगवतः स्वध
र्मेण घृताभ्यक्तत्वादिना नियुक्तायां पतिश्वशुरादिभिरनुज्ञातायां तदयमर्थः मृतस्य वाऽक्षमस्य वा भार्या
यां पतिश्वशुरादिनियोगेन देवरेणान्येन वोत्कृष्टजातीयेन घृताभ्यङ्गादिमता उत्पादितः क्षेत्रजः पुत्रः स च

सुतः द्वितीयस्तु पितुस्तस्यास्तृतीयंतु तु पितुः पितुः अथ पौनर्भवलक्षणम् विष्णुः चतुर्थः पौनर्भवः या तु पत्या परित्य=
क्ता विधवा स्वेच्छया थवा उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते पुनर्भूत्वा पुनः पुरुषान्तरेण सवर्णेनात्मानं
विवाह्य यं पुत्रमुत्पादयेत् स पौनर्भवः याज्ञवल्क्यः क्षतायां वाक्षतायां वा जातः पौनर्भवः सुतः कात्यायनः ॥
क्लीबं विहाय पतितं या पुनर्लभते पतिम् तस्यां पौनर्भवो जातो व्यक्तमुत्पादकस्य सः अथ कानीनः तत्र विष्णुः
।कानीनः पंचमः तथा या पितृगृहे संस्कृता कामादुत्पादयेत्सुतम् स कानीनो मातामहस्य भवतीत्याह तदेवं
कन्यादशायामेव सवर्णेन यः पुत्र उत्पादितः स कानीनकः स मातामहस्यैव श्राद्धकारी यदि तु तस्याः परिणेता
पि निरपत्यो भवति तदा तस्यापि श्राद्धकारी सः तथा च ब्रह्मपुराणे अदत्तायां च यो जातः सवर्णेन पितुर्गृहे।
स कानीनः सुतस्तस्य यस्मै सा दीयते पुनः यदि तु कानीनस्य मातामहो निरपत्यः कन्यापरिणेता च निरप=
त्यस्तदा द्वयोरपि स श्राद्धकारीति पारिजातः अथ गूढोत्पन्नः विष्णुः गूढोत्पन्नः षष्ठो यस्य तल्पजस्तस्यासौ
मनुः उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य चित् स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः तल्पं दाराः यस्य त
ल्पजो यस्य भार्यायां जातस्तस्य सुतः स भवति वीजिनोऽपरिचयान्मातृजातीयश्चासौ यदि हीनजातीयसंगमशं

विधिना अग्निस्थापनादि कृत्वा आद्याएवा
ताप्रथमत एव बन्धूनाहूय राज्ञे च कथयित्वा स्वगृहमध्ये स्वगृह्योक्त विधिना अग्निस्थापनादि कृत्वा आद्याएवा नैमित्तिकं व्याहृतिहोमं कुर्यात् ततो होमा
ज्यभागमहाव्याहृति सर्वप्रायश्चित्तप्राजापत्यस्विष्टकृद्धोमान् नित्यान्कृत्वा तत्र नैमित्तिकं व्याहृतिहोमं कुर्यात् ततो होमा
न्तरवत् संस्रवप्राशनादि पूर्णहोमान्तं कृत्वा पुत्रं प्रतिगृह्णीयात् अदूर बान्धवसन्निकृष्टं स्वजनभूतमित्यर्थः तदभा
वे सन्निकृष्टमेव एवशब्दोऽप्यर्थः तेन तदभावे ऽसन्निकृष्टमपीत्यर्थः अत्र राजनिवस्युषुच निवेदनं दृष्टार्थमे
वतस्य धनग्रहणे निःशंकत्वार्थं न त्वदृष्टार्थमतो निवेदनेनेषां न धर्मविश्लेषः एवं च व्याहृतिहोमस्य पुत्रप्रतिग्र
हांगत्वात् व्याहृतिमन्त्रपाठे च स्त्रीशूद्रयोरनधिकारात् स्त्रीशूद्रयोर्दत्तकः पुत्रो न भवतीत्येवेति मनुः कस्य
गोत्रे जनयितुर्नहरेद्दत्त्रिमः सुतः कृक्थगोत्रानुगः पिण्डो व्यपैति ददतः स्वधा अस्यार्थः दत्तकस्य जनकगोत्रं
नावतिष्ठते न च तदनभागो भवति। जनकस्य पिंडदाने श्राद्धे दत्तकस्यनाधिकारः किन्तु येन गृहीतस्तस्यैव पिंडश्रा
द्धादावधिकारः तद्दत्तगोत्रग्राहकत्वं च भवति॥ अथ क्रीतः। विष्णुः। क्रीतश्च नवमः मनुः क्रीणीयाद्यस्त्वपत्यार्थे
मातापित्रोर्यमंतिकात् स तु क्रीतः सुतस्तस्य सदृशो ऽसदृशोपि वा अस्यार्थः मातापित्रोः सकाशात् यत्क्री
णीयात्स क्रीतः पुत्रः क्रेतुरेव पिण्डप्रदः सदृशः सवर्णः असदृशो ऽसवर्ण इति पारिजातः। प्रकाशका

पिंडप्रदः निजपित्रादीनां च पिण्डप्रदत्वं तस्यातिष्ठत्येव तत्रप्रकारः शुभसमये पुत्रकर्त्तास्नातः किञ्चिदभीष्टं व
स्तु दत्वा त्वं मम पुत्रो भवेति वदेत् तव पुत्रभूतोस्मीति स प्रतिवदेत् वस्तुदानमन्त्राचारप्राशनं त्वावश्यकं पुत्र
त्वकरणे च तदुभयोरनुमतिरेव प्रयोजिका तेन वाक्यविशेषस्य न पुरस्कारः अथ शूद्रापुत्रः विष्णुः यत्रक्वचनोत्पा
दितस्तु द्वादशः यत्रक्वचनेति ऊढायाम् अनूढायां वा शूद्रायामित्यर्थः एवमेव रत्नाकरः तच्च शूद्रापुत्रस्य
द्वादशत्वं कल्पांतरमेव वस्तुतस्त्रयोदशत्वमेव कृत्रिमस्यैव बहुषु वाक्येषु द्वादशत्वेन पाठात् विष्णुस्मृ
तौ तु कृत्रिमः पुत्रः परिगणित एव नेति तत्र शूद्रापुत्रस्य द्वादशत्वं। मनुः यं ब्राह्मणस्तु शूद्रायां कामादुत्पा
दयेत्सुतं स पारयन्नेव शवस्तेन पारशवः स्मृतः पारयन्नेव पितृत्वाभिमतस्य किञ्चिदुपकुर्वन्नेवाऽल्पोप
कारित्वात् पारशवः स च जनयितुः पिंडप्रदः एवं चानूढशूद्राजातस्य पुत्रस्य जनकशूद्रश्राद्धाद्यावतितरा
मधिकारः यत्र च शूद्रस्य विवाहिता भार्यास्ति तथाविधः पुत्रश्च तत्रापि स पुत्र एवाधिकारीति। बृहस्पतिः।
पुत्रास्त्रयोदश प्रोक्ता मनुना ये तु सर्वशः संतानकारणात्तेषामौरसः पुत्रिकस्तथा आज्यं विना यथा तैलं सद्भिः

ह्यातुल्यो भवति। एकः पिंडः स्वधासंबंधी येषां ते एकपिंडस्वधाः तेषां दशममवधीकृत्य परतो धर्मनिवृत्तिरशौचा
दिनिवृत्तिः सप्तममवधीकृत्य परतो दायनिवृत्तिः। तृतीयमवधीकृत्य स्वधानिवृत्तिः श्राद्धादिनिवृत्तिः अन्यथा च
तुर्थीदर्वाक् पिंडनिवृत्तौ सप्तमादर्वाक् कस्यविच्छित्तौ एकादशादर्वाक् अशौचनिवृत्तौ पापवान् भवतीत्यर्थः।
।मत्स्यपुराणे लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषं इदं प्रकारांतर
मेव कूर्मपुराणे अप्रत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषं प्रत्तानां भर्तृसापिंड्यं प्राह देवः पितामहः अप्रत्तानामवि
वाहितानां प्रत्तानां विवाहितानां एवं च रत्नाकरलिखितेन तद्वाक्यपर्यालोचनया यद्वसिष्ठवचनं प्रत्तानां स्त्रीणां त्रिपुरुष
मिति सापिण्ड्यं प्रतिपादितं तत् त्यागदानोत्तरविषयमिति प्रतिभाति कन्यानामपि सप्तपुरुषावधि सपिंडत्वव्य
वहारात् अत्र च प्रकरणार्थः अशौचभागिनां सप्तमं मृतस्य च प्रसूतस्य च बीजिपर्यन्तगणनया सप्तपुरुषा
भ्यन्तरत्वे सपिंडता भवति दशमपुरुषाभ्यन्तरत्वे समानोदकता भवति सैव सकुल्यतां ततः परमस्मात्पुरुषात्
अयं जात इति ज्ञानाभावे अस्मत्कुलजात इत्येवमाकारज्ञानमात्रे गोत्रा गोत्रजा इत्युच्यन्ते। दशमपुरुषाद
नन्तरं ज्ञायमानजन्मनामत्वे बान्धवपदव्यपदेशः पक्षिण्यशौचविधानं च प्रकरणान्तरादेवेति इति सद्यश

लानुनखशोधनं हस्तद्वयेइति शेषः केवलमूत्रोत्सर्गेदशः एकालिंगेतु सव्यत्रिरुभयोर्द्वयंस्मृतम् सव्ये २५

हस्तेउभयोर्हस्तयोरित्यर्थः ब्रह्मपुराणे पादयोर्द्वे गृहीत्वा च सुप्रक्षालितपाणिना आचम्य तु ततः शुद्धः॥
स्मृत्वा विष्णुं सनातनं पादयोर्द्वे प्रतिपादमेकैकां मृद्द्याद्बौधायनः मूत्रवद्रेतसः संसर्गे शौचमिति शेषः॥
शंखः मृत्तिका तु समुद्दिष्टा त्रिपर्वपूर्यते यया इदं मृत्तिकापरिमाणकथनं गुदं विहाय तत्र दक्षः अर्द्धप्रसृति
मात्रा तु प्रथमा मृत्तिका स्मृता द्वितीया च तृतीया च तदर्द्धं परिकीर्तिताः ऋष्यशृङ्गः यस्मिन्स्थाने कृतं शौचं वारि
णा तन्तु शोधयेत् न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत् मृत्तिकासङ्ख्यामुक्त्वा मनुः एतच्छौचं गृहस्थानां
द्विगुणं ब्रह्मचारिणां त्रिगुणं तु वनस्थानां यतीनां च चतुर्गुणं आपस्तंबः अद्भिः शौचं यथा प्रोक्तं निशपर्द्धं
न्तु तदिष्यते पथि पादस्तु विज्ञेय आर्तः कुर्याद्यथाबलं पथीति यत्र मार्गे विलंबे सति चौरादिनो निष्ठ शंकाभ
वति तत्परं आर्तो रोगी यमः सकर्द्दमासु रथ्यासु प्रविश्य ग्रामसंकरं जंघाभ्यां मृत्तिकास्तिस्रः पद्भ्यां तु।
द्विगुणाः स्मृताः अथ प्रक्षालनादि शुद्धिः अद्भिरः ऊर्ध्वन्नाभेः करौ मुक्त्वा यदंगमुपहन्यते तत्र स्नानम ध
स्तात्तु क्षालनेनैव शुद्ध्यति इन्द्रिये च प्रविष्टं स्यादमेध्यं यदि कुत्रचित् मुखेऽपि संस्पर्शगतं तत्र स्नानं विशोधनं।
विष्णुः नाभेरधस्तात्स्रवाहुषु च कायिकैर्मलैः सुराभिर्मद्यैर्वापि हतो मृतो यैस्तदंगं प्रक्षाल्याचम्यात्ततः शु

मोदित्यर्थः॥ विष्णुः पञ्चनखास्थ्यस्नेहं स्पृष्ट्वाचमेत् चाण्डालम्लेच्छभाषणे चापञ्चनखास्थि मस्यनरपं=
ञ्चनखास्थि आपस्तम्बः रिक्तपाणिर्वयस उद्यम्यापउपस्पृशेत् शक्तिविषयेन मुहूर्त्तमप्यप्रयतः स्या
त्। रिक्तपाणिः शून्यहस्तो वयसे पक्षिणे उद्यम्य पाणिमाचामेदित्यर्थः हारीतः देवतामभिगन्तुकाम आ
चामेत् तथा नोत्तरेदनुपस्पृश्य जलपारगमने पूर्वमाचमितव्यमित्यर्थः यमः उत्तीर्योदकमाचम्यावतीर्य
पउपस्पृशेत्। एवं स्याच्छ्रेयसा — युक्तो वरुणश्चैव पूजितः मन्वङ्गिरोबृहस्पतयः सुप्त्वा क्षुत्वा च भु=
क्त्वा च निष्ठीव्योक्त्वानृतं वचः पीत्वापोऽध्येष्यमाणश्च आचामेत् प्रयतोऽपि सन् क्षुत्वा छिक्कां कृत्वेत्यर्थः
अत्र शयनादिकृत्वा द्विराचमनं कर्त्तव्यम् वेदाध्ययनपूर्वकाले च द्विराचमनमित्यर्थः वायुपुराणे निष्ठी
वनेन तथाभ्यङ्गे तथा पादावसेचने उच्छिष्टस्य च संभाषादशुच्युपहतस्य च संदेहेषु च सर्वेषु शिखां मु
क्त्वा तथैव च विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत् उष्ट्रवायससंस्पर्शे दर्शने चान्त्यजन्मनाम्। निष्ठीव
नं मुखेन श्लेष्मत्यागः निष्ठीवनादौ कृते आचमनं सन्देहेषु चाचमननिमित्तसंशयेषु च आचमनं कर्त्त
व्यं शिखां मुक्त्वा विना यज्ञोपवीतेन त्येनाभ्यां शिखामोचनेन यज्ञोपवीतत्यागश्चाचमननिमित्तमुक्तं तेनै

स्यत्र भूमितुल्यास्तु ताः स्मृताः मनुः नोच्छिष्टं कुर्वते मुख्या विप्रुषोंगं न यंति याः। मुख्यामुखभवा विप्रुषो गन्त्रय
न्ति यानि ता उच्छिष्टं न कुर्वत इत्यर्थः अंगं गतासु च द्विरोमलेक्तेदन करणस्समास्वाचमनं तथा पैठीनसिः द्विरोम
क्लिन्नेष्वाचामेत् अभ्यङ्गिरसो मधुपर्के तु सोमे च अप्सु प्राणाहुतीषु च नोच्छिष्टस्तु भवेद्धि प्रोयथान्नेर्वे वचनं
तथा अप्सु अपोशाने एवमेव कल्पतरुः प्राणाहुतीषु पंच ग्रासं शनातानपः दंतलग्ने फले मूले भक्ष्ये स्नेहे तथैव च
तांबूले चेक्षुखण्डे च नोच्छिष्टो भवति द्विजः फले तिक्तकषाये जाती फलादौ समाचारादित्याहुः प्रामाणिकाः। भ
क्ष्ये कटुकपाये मनुः उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् द्रव्यहस्तो
दुग्धादिहस्त एवाचान्तः शुचितां प्राप्नुयादिति रत्नाकरः। द्रव्यमत्रान्नपानव्यतिरिक्तमित्याचारादर्शः बृहस्पतिः प्र
चरंश्चान्नपानेषु यदोच्छिष्टमुपस्पृशेत् भूमौ निधाय तद्द्रव्यमाचम्य प्रचरेत्पुनः प्रचरन् परिवेषणं कुर्वाणः
अन्नपानेषु स्नेहपक्वादिष्विति रत्नाकरः भूमिनिहितस्य तु द्रव्यास्पृश्यत्वं तथा अरण्येनुदके रात्रौ चोरव्याघ्रा
कुले पथि कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति शौचं तु कुर्यात्प्रथमं पादौ प्रक्षालयेत्ततः उपस्पृश्य तदभ्यु
क्ष्य गृहीतं शुचितामियात् आपस्तम्बः कृत्वा मूत्रपुरीषं च द्रव्यहस्तः कथंचन भूमावन्नं प्रतिष्ठाप्य कृत्वास्नानं

विष्णूक्तं एतच्च सर्वं द्विजास्थिस्पर्शे अन्यत्र तु कामकृते वसिष्ठः मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमशौचं अस्निग्धे
त्वहोरात्रमिति अत्र सर्वैकवाक्यतया यमर्थः भक्ष्यपंचनखास्थिस्पर्शे दोषाभावः अभक्ष्यपंचनखास्नेहा=
स्थिस्पर्शे आचमनं सस्नेहब्राह्मणास्थिस्पर्शेऽकामकृते स्नानमात्रम् कामकृते स्निग्धास्निग्धब्राह्मणास्थिस्प
र्शे स्नाने गोस्पर्शने सूर्यदर्शने विष्णुस्मरणं निःस्नेहब्राह्मणास्थिस्पर्शे अकामकृते आचमनमात्रम् ब्राह्मणेतर
मानुषसंबंधि स्निग्धास्थिस्पर्शे कामकृते त्रिरात्रमशौचं अस्निग्धब्राह्मणेतरास्थिस्पर्शेऽकामकृतेऽहोरात्रमशौ
चम् मनुः वान्तो विरक्तः स्नात्वा च घृतप्राशनमाचरेत् आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतं वान्तः कृतवमनः
विरक्तः कृतविरेकः प्रकृताधिकविरेकवान् एवंभूत्वा स्नात्वा घृतं प्राश्य विशुद्ध्यतीत्यर्थः मिलितं चैतद् द्वयं निमि=
त्तम् मैथुने दुःस्वप्ने वमनविरेकयोरिति विष्णुवचनादिति रत्नाकरः आचामेदित्यादि अन्नं भुक्त्वावान् आचामे
देव न स्नायात् तेन दिनान्तरे वमनविरेकयोः स्नाननिमित्तत्वमित्यर्थः स्नानं मैथुनिन इत्यपि ऋतुकालमैथुनविषयं
तथा च शातातपः ऋतौ तु गर्भशंकित्वात् स्नानं मैथुनिनः स्मृतं अनृतौ तु सदा कार्य्यं शौचं मूत्रपुरीषवत् मूत्रपुरीष
वदिति लेपाल्पत्वभूयस्त्वविषयतया व्यवस्थितं यमः अजीर्णेऽभ्युदिते वान्ते श्मश्रुकर्मणि मैथुने दुःस्वप्ने दुर्जने=

शुद्ध्यति इति अङ्गिरोवचनात् अधःस्पर्शेतु क्षालनं आचमनमुभयत्र बौधायनः चाण्डालेन सहाध्वगमने सचै
लस्नानम् इदं च कामकृतविषयं चांडालस्य मुख्यतया तत्सहगमनविषयमित्यर्थ इति रत्नाकरः पाराशरः चै
त्यवृक्षश्चितिर्यूपश्चांडालः सोमविक्रयी एतांस्तु ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत् बौधायनः शुनोपहतः सचैलो
जलमवगाहेत प्रक्षाल्य वा तं देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाचम्य प्रयतो भवति शुनोपहतः शुनास्पृ
ष्टः अत्र नाभेरूर्ध्वे स्पर्शे स्नानं नाभेरधः स्पर्शे प्रक्षाल्याचमनं चेति व्यवस्थितो विकल्प इति रत्नाकरः हारीतः श्वप
चमुष्टिकप्रेतहारकशवादि संस्पृश्य देवीरापइत्येताभिरंतर्जले स्नातः पूताभवति श्वपचः श्वखादकः टांक
इति प्रसिद्धः मुष्टिकः शवर इति रत्नाकरः देवीरापइत्येताः देवीरापो अपान्नपादित्याद्यास्तिस्र ऋचः अयं च प्रयो
गो वारंवारस्पर्शे अन्यथा स्नानमात्रं तथा अजीर्णवान्तश्मश्रुकर्माऽयोनिपशुदिवामैथुनगमने च अयोनियोनि
व्यतिरिक्तमंगं पशुर्गवादिः दिवा दिने एतेषु मैथुनगमने अजीर्णवान्तश्मश्रुकर्मणो श्वस्नानमित्यर्थः पराशरः
श्वकाकैरवलीढस्य नखैर्विदलितस्य च अद्भिः प्रक्षालनं शौचमग्निना चोपचूडनं अवलीढस्य जिह्वया स्पृष्टस्य
उपचूडनं शिरो भिन्नांगे वन्हिज्वालया स्पर्शनं च्यवनः श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्राममया=

ति भाण्डादिवानदापुरुषादेरशौचाभावः तद्विषयमेवमार्जारश्चसदाशुचिरितिविष्णुवचनमितिव्यवस्थेत्याचाराद=
र्शः पैठीनसिः अनुदकमूत्रपुरीषकरणे सचैलस्नानं उदकव्यतिरेकेण मूत्रपुरीषोत्सर्गानंतरं शौचविलंवे शौचं
कृत्वा स्नानमित्यर्थः ब्रह्मपुराणे उच्छिष्टेनाथ विप्रेण विप्रस्पृष्टस्तु नादृशः उभौ स्नानं प्रकुर्वीत सद्य एव विशु
ध्यतः लघुहारीतः श्वविष्ठां काकविष्ठां वा काकगृध्रनरस्य च अधोच्छिष्टश्च संस्पृश्य सचैलो जलमाविशे
त् ऊर्ध्वोच्छिष्टस्तु संस्पृष्टः प्रायश्चित्तं समाचरेत् उपोष्य रजनीमेकां पंचगव्येन शुद्ध्यति अधोच्छिष्टो मूत्राद्यु
त्सर्गेणाशुद्धः ऊर्ध्वोच्छिष्टो भोजनोच्छिष्टः जलमाविशेत् सचैलं स्नायादित्यर्थः सर्वत्र चात्र प्रकरणे जलमा
विशेदित्यादिवाक्यानि वरुणस्नानोपलक्षकानीत्याचारादर्शः शंखः रथ्याकर्दमतोयेन ष्ठीवनाद्येन पुनः नाभेरू
र्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुद्ध्यति अत्र च प्रकरणे एषु नैमित्तिकस्नानेषु मंत्र तर्पणे न स्तः तथा चापस्तं
बः अस्पृश्यस्पर्शने वान्ते अश्रुपाते क्षुरे भगे स्नानं नैमित्तिकं प्रोक्तं दैवपैत्रविवर्जितं। जलाशयमज्जनासं
भवे उष्णोदकेनाप्येतत्स्नानं कर्त्तव्य तथा च शंखः नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं तीर्थाभावे पि कर्त्त
व्यमुष्णोदकपरोदकैः क्रियांगं देवपूजादिक्रियांगं मलकर्षणमभ्यङ्गपूर्वकं यदा तु रोगादिवशादुष्णोद=

लोहस्यचविनिर्द्दिशेत् एतदपिस्नेहादिलेपयुक्तविषयं पैठीनसिः त्रपुसीसकानांगोमयतुषैः तथा उच्छिष्ट
स्नेहसंस्पर्शे क्षारोदकाभ्यामब्जस्यच अब्जस्य शंखशुक्त्यादेः बौधायनः तैजसानान्तु पात्राणामुच्छिष्टोपहा
तानांत्रिः सप्तकृत्वः परिमार्ज्जनं परिमार्जनेद्रव्याणि मृद्गोमयभस्मानि मूत्रपुरीषलोहितरेतः प्रभृत्युपहता
नांपुनः करणंगोमूत्रेवासप्तरात्रंपरिस्थापनंमहानद्यांवा एवमश्ममयानांच आलाबूबिल्ववैदलानांगोबा
लैः परिमार्जनंनलवेणुकुशस्थूणानांगोमयोदकेनप्रक्षालनंत्रिः सप्तकृत्वः परिमार्जनमेकविंशतिवारानि
त्यर्थः वैदलानांवेणुदलादिनिर्मितानामित्यर्थः शातातपः गवाघ्रातेषुकांस्येषुशूद्रोच्छिष्टेषुवापुनः दश
भिर्भस्मभिः शुद्धिः श्वकाकोपहतेषुच अंगिराः गंडूषपादशौचंचयः कुर्यात् कांस्यभाजने भूमौनिक्षि
प्यषण्मासान्पुनराकरमाविशेत् यद्दसार्षत्वात्विभक्तिव्यत्ययेनसप्तम्यर्थेप्रथमा आकरमाविशेत्।
अग्नौदहेत् शंखः सूतिकोच्छिष्टभांडस्यसुरामद्यहतस्यचत्रिः सप्तमार्जनैः शुद्धिर्नतुकांस्यस्यभाजने भां
डस्यभाजनस्यसौवर्णादेः सुरागौडीपैष्टीमाध्वीत्रिधा तद्व्यतिरिक्तंपनसादिसंभवंमद्यम् ताभ्यांचोपहत
स्यत्रिः सप्तमार्जनैरेकविंशतिमार्जनैः शुद्धिः कांस्यस्यतुनैवंशुद्धिः किंतुसकृदुपहते अग्नौप्रतापनंएभिरस

त शुध्यंति। मूत्रपुरीषरेतःप्रभृतिभिः शारीरैर्मलैरल्पकालमुपहतानि तैजसपात्राणि सप्तरात्रं गोमूत्रे महानद्यां वा
स्थापनात् शुध्यंति। अनेकवारं मूत्राद्युपहतानि शवसूतिकारजस्वलोपहतानि च वारत्रयं क्षारोदकप्रक्षा
लनानंतरं यावत्सहनमग्नौ प्रतापनात् शुध्यंति। चिरकालं व्याप्य वारं वारं मूत्रादिभिरुपहतानि पुनर्घटनेन
शुध्यन्ति। देवलः लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन वा दहनात् खननाद्यपि शैलानामंभसापि वा। काष्ठा
नां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि। मृण्मयानां तु पात्राणां दहनाच्छुद्धिरिष्यते। अत्र दहनादिरत्यंतोपघात
विषयं अन्यथा भस्मना गोमयेन वा। शैलशिलाभाजनेन तत्रापि अत्यंतोपघाते दहनेन खननेन वा अन्यथा ज
लेन। काष्ठभाजनानामपि सलेपोपघाते तक्षणादन्यत्र जलेनैवेति व्यवस्था मृण्मयानामत्यंतानुपहतानां पुनः
पाकः अत्यंतोपहतानां मृण्मयानां दारवाणां च त्यागः। तथा च विष्णुः दारवं मृण्मयं च जत्यात् तच्चात्यंतोपहत
मिति। पूर्वं प्रस्तुतं कश्यपः सिकताभिर्दन्तशृंगशंखशुक्तीनां। सिकताभिर्जलयुक्तवालुकाभिः अत्यंतोपघा
तविषयं चेदं। अन्यथा केवलजलेन शुद्धिः। शुद्धिरित्यनुवृत्तौ हारीतः अद्भिः कांचनराजतानां तद्गुणवर्ण
योगात्। स्नेहवैवर्ण्योपहतानामेव गोधूमकलायमाषगोमयचूर्णैर्मार्जनं गोरोचनादिभिः प्रक्षालनं। आम्ल

फलवल्कलैः तूलिकामुपधानानि पुष्परक्तांबराणि च शोधयित्वा तपेत् किंचित्करैरुन्मार्जयेन्मुहुः पश्चाच्च वा
रिणा प्रोक्ष्य शुचीन्येवमुदाहरेत् तान्यप्यतिमलिष्टानि यथावत्परिशोधयेत् शातातपः कुसुंभकुंकुमारक्तास्त
थालाक्षारसेन च प्रक्षालनेन शुध्यंति चांडालस्पर्शनेन तथा। अंगिराः शौचं सहस्ररोमाणां वाय्वग्न्यर्केन्दुरश्मि
भिः रेतःस्पृष्टं शवस्पृष्टमाविकं नैव दुष्यति शयनासनयानानि रोमबद्धानि यानि च वस्त्राण्येतानि सर्वाणि संह
तानि प्रचक्षते सहस्ररोमाणामिति ऊर्णादिरोमनिर्मितानामित्यर्थः रोमबद्धानि कंबलादीनि संहतानि शयनादी
नि च तानि वाय्वादिभिः शुद्ध्यन्तीत्यर्थः उशनाः कौशेयानां गौरसर्षपकल्केन मृद्भिश्चान्येषां। ब्रह्मपुराणे।
प्रत्यहं क्षालयेद्वस्त्रं दैव्ये पित्र्ये च कर्मणि सर्वं विण्मूत्रशुक्रैस्तु दूषितं च मृदम्बुभिः। मृदम्बुभिः शुद्ध्यती
ति शेषः विष्णुः अत्यंतोपहतस्य यत् प्रक्षालितं सन्न विरज्यते तेन च्छिन्द्यात् बृहस्पतिः वस्त्रवैदलचर्मा
देः शुद्धिः प्रक्षालनं स्मृतं अतिदुष्टस्य तन्मात्रं तत्र च्छित्वा तु शोधयेत् यमः कृष्णाजिनानां बाले
ष्वबालानां मृद्भिरंभसा गोमूत्रेणास्थिदन्तानां क्षौमानां गौरसर्षपैः बालानां चामराणामित्यर्थः शंखः।
सिद्धार्थकानां कल्केन दन्तशृंगमयस्य च। गोवालैः फलपात्राणामस्थ्नां स्याच्छृंगवत्तथा फलपात्राः

णप्रक्षालनपर्यग्निकरणैः शाकमूलफलानां भूस्यग्रहणे प्रक्षालनैरिक्षुकाण्डानां शमीधान्यवत् यत्तु हवि
ष्यार्थं श्रपणमेव स्नेहानां पुनः पाकः कृतलवणानां पुष्कलादिभिः स्पृष्टानां भूस्यानां तृणकाष्ठानामादित्यदर्श
नाच्छेदो चंदनानां दंतनिर्मितानां क्रयो पात्तानां व्रीहियवादीनां शमीधान्यानां मुद्गादीनां शिंबिप्रभवानां फली
कृतानां तण्डुलानां अवहननं कंडनं उत्प्लवनं प्रस्फोटनं शूर्पेण निस्तुषीकरणं पर्यग्निकरणं तदुपरि अग्निभ्रा
मणमित्यर्थः शुद्धिरित्यनुवृत्तौ विष्णुः गुडादीनामिक्षुविकाराणां प्रभूतानां वाय्वग्निदानेन सर्वलवणानां
च तथा द्रव्यवत् कृतशौचानां देवतार्चानां भूयः प्रतिष्ठापनेन असिद्धान्नस्य यावन्मात्रमुपहतं तावन्मात्रप
रित्यज्य शेषस्य कंडनक्षालने कुर्यात्। देवतार्चा देवप्रतिमा तस्या अस्पृश्यादिस्पृष्टायाः कृतप्रकृतिद्रव्यस्य
ताम्रादेः यथोक्तं शौचं कृत्वा पुनः प्रतिष्ठापनेन शुद्धिः पूजार्हत्वमित्यर्थः अतिमलिनानुवृत्तौ देवलः सर्वद्र=
व्याणां पक्वानां लवणस्य गुडस्य च नान्यच्छेदो चंपरित्यागाद् शुद्धानामिति स्थितिः। तोयाभावे परस्पर्शे भूमिसंवे
शने पि च कुंडिकायाः परित्यागे दहनं चापदि स्मृतं। कुंडिका कमंडलुः। तस्याश्च तोयहीनायाः अशुचिस्पृष्टाया
अशुद्धभूमिधृतायाश्च परित्यागः। कुंडिकांतरालाभे दग्ध्वा ग्राह्या। तथा द्रव्याणामवशिष्टानां तोयाग्निभ्यां विशो

तं अत्यंतोपहतंसर्वंलोह भांडमग्नौप्रतप्तंशुद्ध्येत् मणिमयमश्ममयमब्जमयंचसप्तरात्रंमहीनिखनेन दंतशृंगो
स्थिमयंच तक्षणेन दारवमृण्मयंचजह्यात् अत्यंतोपहतस्यवस्त्रस्ययत् प्रक्षालितंसत्नविरज्येततच्छिन्द्या
त् लोहभाण्डंसुवर्णाद्यष्टधातुमयभाजनमितिरत्नाकरः स्मार्गोडीपैष्टीमाध्वीत्रिविधातदितरंमद्यंशारीराणिम=
लानिद्वादशविधानिवसादीनि बौधायनः अतैजसानामत्यंतोपहतानांचत्यागः एषचत्यागोविप्रमुक्तमणिमया
दिभाजनवर्जम् शंखः मद्यैर्मूत्रपुरीषैश्चश्लेष्मपूयाऽश्रुशोणितैः संस्पृष्टंनैवशुद्ध्येतपुनःपाकेनमृण्मयं ए
तैरेवतथास्पृष्टंताम्रसौवर्णराजतम् शुद्ध्येत्सावर्त्तितंपश्चादन्यथाकेवलांभसा। अत्रचतैजसेव्यवस्थाप्रथम
मेवदर्शिताद्रव्यशुद्धिप्रकरणे। देवलः दूषितंवर्जितंदुष्टंकश्मलंचेतिलिंगिनाम् चतुर्विधममेध्यंचसर्वंव्याख्या
स्यतेपुनः लिङ्गिनामाश्रमिणामित्यर्थः शुच्यप्यशुचिसंस्पृष्टंद्रव्यंदूषितमुच्यते अभक्ष्यभोज्यपेयानिवर्जितानीह
चक्षते। स्पृक्तः पतितचाण्डालौग्रामकुक्कुटशूकरौ श्वाचनित्यंविवर्ज्याः स्युः षडेतधर्मतः समाः। सव्रणः सूतकी
सूतीमत्तोन्मत्तरजस्वलाः मृतबंधुरशुद्धश्चवर्ज्यान्येषैस्वकालतः। सूतीप्रसूतिका अशुद्धःपुरीषादिना। स्वेदा
श्रुविंदवः फेनोनिरस्तंनखलोमच आ ॥ ॥ ॥ ॥ ॥ ॥

पिपीलिकाः आमिषामेध्यसेवी च नैते कीटा विपत्तये आमिषामेध्यसेवी। सटिन। मांसोद्भवः कीटः एते कीटा विपत्त
ये अन्नदोषायन भवंतीत्यर्थः शुद्धिस्तु भस्मादिनैवेति भावः शातातपः केशकीटगवाघ्रातं वायसोपहतं च यत
क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः दृष्टं वास्याद्यदन्नं तु न तस्य निष्कृतिरुच्यते अभ्युक्ष्य किंचिदुद्धृ=
त्य भुंजीताप्यविशंकितः भस्मना चापि संस्पृश्य संस्पृश्योदुदकेन वा। सुवर्णरजताभ्यां वा भोज्यं घ्रातमजेन वा तथा
श्वशूकरखरोष्ट्रश्वपदालीढं तु जंतुभिः अग्रं विहाय तत्पश्चात्संस्पृश्यमथाग्निना छागघ्रातेन ततः शुद्धं स्याद्द
मजलसंयुतं तथा घृतं तु पायसं क्षीरं तथैवेक्षुरसोद्भवं शूद्रभांडगतं नक्तं तथा मधु न दुष्यति पायसं पयोविका
रो दध्यादीनि रत्नाकरः कल्पतरुप्रभृतयोप्येवम् एवं च कटुपक्वं स्नेहपक्वं पायसं दधिसक्तवः एतान्या=
शूद्रान्नभुजो भोज्यानि मनुरब्रवीत् कटुपक्वानि तैलेन पायसं दधिसक्तवः द्विजैरेतानि भोज्यानि शूद्रगेहकृता
न्यपीति हारीतकूर्मपुराणयोरपि वाक्ययोः पायसपदं दधीतराद्यामिक्षादिपयोविकारपरं बौधायनः स
केशलोमनखारवुपुरीषाणि दृष्ट्वा तं देशपिंडानुद्धृत्य अद्भिरभ्युक्ष्य भस्मनावकीर्य पुनरपि प्रोक्ष्य वाचा प्रश
स्तमुपभुंजीत सिद्धहविषां महतां श्ववायसप्रभृत्युपहतानां तद्देशपिंडमुद्धृत्य। पवमानः सुवर्चस इत्येतेः

वस्त्रस्य दर्शयेत् अन्नेच द्रोणः षोडशप्रस्थाः वस्तः छागः। बृहस्पतिः तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति आपद्यपि च कष्टायां सभये पीडने सदा मातापित्रोर्गुरोश्चैव निदेशाव
र्तेनात्तथा आममांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः म्लेच्छभांडगता दूष्या निष्क्रांताः शुचयः स्मृताः शातातपः
गोकुले कंटशालायां तैलयंत्रेक्षुयंत्रयोः अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च अमीमांस्यानि शौचाशौच भा
मित यानविचारणीयानीत्यर्थः बालः पंचवर्षाभ्यंतरवयस्कः अथ भूमिशुद्धिः तत्र देवलः पंचधा वा चतुर्धा वा
भूरमेध्या विशुद्ध्यति दुष्टा द्विधा त्रिधा वापि शोध्यते मलिनैकधा दहनं खननं भूमेरुपलेपनवापनम् पर्जन्य
वर्षणं चेति शौचं पंचविधं स्मृतं अस्यार्थः भूमिस्तावत्त्रिधा अपवित्रा भवति अमेध्या दुष्टा मलिना चेति। तत्रा
मेध्याया दहनादिभिः पंचभिश्चतुर्भिर्वा शुद्धिः। दुष्टायाः दहनादिभिस्त्रिभिः खननलेपनाभ्यां वा द्वाभ्यां म
लिनायाः। एकधा उपलेपनेन शुद्धिः। वापनं मृदंतरेण पूरणं। तासु अमेध्यामाह प्रसूते गर्भिणी यत्र म्रियते
यत्र मानुषः चांडालैरुषितं यत्र यत्र विन्यस्यते शवः विण्मूत्रोपहतं यच्च कुणपो यत्र दृश्यते एवं कश्मलभूयिष्ठा
भूरमेध्येति लक्ष्यते। दुष्टामाह कृमिकीटपदक्षेपैर्दूषिता मेदिनी यदि। द्रप्सायकर्षणैः क्षिप्तैर्वांतैर्वा दुष्टतां व्र

पयेहुधः ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिणा सर्वमभ्युक्षयेद्देश्मततः शुद्ध्यत्यसंशयं यमः ब्राह्मणावस
थे भूमिर्देवागारे तथैव च मेध्यां चैव सदा मन्येद्गवां गोष्ठे तथैव च एतेषु या भूमिस्तां मेध्यां मन्येद्दिन्त्यर्थः अ
नुपहतविषयं चैतत् ब्रह्मपुराणे देवानां प्रतिमाश्चापि वेश्मान्यायतनानि च। बाह्यमाभ्यन्तरं शल्यं भूमेरुद्ध
त्य शास्त्रवत् ततस्तोयेन गोभिश्च दाहोल्लेखनमार्जनैः। शोधनीया च मंत्रैश्च सरत्नैः पंचभिश्च भूः उद्धृत्य मृत्तिकान्ला
व्याः पवित्रेण जलेन च। ग्रामाद्दशगुणत्यक्ता नगराच्च चतुर्गुणम्। भूमिः सर्वत्र मेध्या स्यात् यत्र लेपो न दृश्यते
मरीचिः गृहेष्वज्ञातिसंवेशे। शुचिः स्यादवलेपनात् संवासो यदि जायेत दाहतापौ विनिर्दिशेत् अज्ञातिश्चा
ण्डालः संवेशः प्रवेशः। संवासोऽवस्थितिः। याज्ञवल्क्यः रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः मारुतार्के
ण शुद्ध्यन्ति पक्वेष्टकचितानि च अन्त्यश्चाण्डालः तथा पंथानश्च विशुद्ध्यन्ति सोमसूर्यांशुमारुतैः निर्लेपविषय
मेतत् बौधायनः अनेकाद्युद्धेदारुशिलेभूमिसमेइष्टकाश्चसंकीर्णीभूताः॥ संकीर्णीभूताः परस्परं संबद्धा इत्य
र्थः पाराशरः रथ्याकर्दमतोयानि नावः पंथास्तृणानि च स्पर्शनान्न प्रदुष्यन्ति पक्वेष्टकचितानि च अथो
दकशुद्धिः मनुः आपः शुद्धा भूमिगता वितृष्णा यत्र गोर्भवेत् अव्याप्ताश्चेदमेध्येन गंधवर्णरसान्विताः। विष्णुः

ष्टानुलेपितं अद्भिः शुद्ध्यतितत्सर्वमपांशुद्धिः कथंभवेत् सूर्येन्दुरश्मिपातेनमारुतस्पर्शनेनच गवांमूत्रपुरीषे
णशुद्ध्यन्त्यापइतिस्थितिः उशनाः नद्यः कूपतडागानिसरांसिसरितस्तथा असंदृष्टाऽन्यदोषाणि मनुःस्वा
यंभुवोऽब्रवीत् सरितः सरणशीलानिर्झररूपाः असंदृष्टानि अस्पृश्यस्पृष्टान्यपीत्यर्थः इतिकल्पतरुः वि
ष्णुः मृतपंचनखात्कूपादत्यंतोपहतात्तथा अपः समुद्धरेत्सर्वाः शेषंशास्त्रेणशोधयेत् वन्हिप्रज्वालनंकृत्वा
कूपेपक्केष्टकाचिते पंचगव्यंन्यसेत्पश्चान्नवंतोयंसमुद्धरेत् जलाशयेषुचान्येषुस्थावरेषुवसुंधरे कूपवत्कथिता
शुद्धिर्महत्सुचनदूषणम् अत्रात्यंतोपहतत्वंपुरीषादिना अतिव्याप्तत्वेनतुपरिभाषिकमत्यंतोपहतत्वं नतुश
रीरमलमात्रस्यग्रहणे अश्रुपातादावपिइयंशुद्धिः स्यात्तथाचातिप्रसंगः आपस्तंबेनचसकृन्मूत्राद्युपघा
तेशुद्धांतरकथनाच्च तथाचापस्तंबः उपानन्म्लेच्छविण्मूत्रस्त्रीरजोमद्यमेवच एभिश्चदूषितेकूपेकुम्भा
नांषष्टिमुद्धरेत् कुंभानां जलपूर्णानामित्यर्थः बृहस्पतिः श्वभिः श्वपाकचाण्डालैर्दूषितेषुविशोधनं
उद्धरेद्दृढकुंमवैमार्जनंपरिशोधनम् श्वपाकश्चण्डालविशेषः तथावापीकूपतडागेषुदूषितेषुविशोध
नम् घटानांशतमुद्धृत्यपंचगव्यंततःक्षिपेत् वापीसोपानयुक्तःकूपः एवंचयत्रघटशतोद्धरणेनैवस

धारयेत्न गंधान्सेवेत् हारीतः भूमौ काष्ठमायसे पाणौ मृण्मये चाश्नीयात् अत्र मिताक्षराकारः दैवे कर्मणि पि
त्र्ये च पंचमे शुद्धिमाप्नुयात् इत्यत्र पंचम इति रजोनिवृत्तिकालोपलक्षणं। पंचमदिनात्पूर्वं रजोनिवृत्तावपि न शु
द्धिः दैवे पित्र्ये च कर्मणि यदा तु रजोदर्शनदिनादारभ्य पुनः सप्तदशदिनाभ्यंतरे रजःसंभवस्तदा अशुचित्वं
नास्त्येव अष्टादशदिने रजःसंभवे त्वेकाहाच्छुद्धिः एकोनविंशे द्व्यहात् तत उत्तरेषु त्र्यहाच्छुद्धिः तथा चा
त्रिः रजस्वला यदि स्नाता पुनरेव रजस्वला अष्टादश दिनादर्वागशुचित्वं न विद्यते एकोनविंशतेरर्वागेकाहं
स्यात्ततो द्व्यहं विंशप्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेत् यत्तु। चतुर्दशदिनादर्वागशुचित्वं न विद्यत इति स्मृत्यंत
रं तत्र स्नानप्रभृतित्वमभिप्रेतमेतेन न विरोधः अयं चाशुचित्व निषेधो यस्या विंशतिदिनोत्तरकालमेव प्रचुररजो
दर्शनं तद्विषयं यस्याः प्रौढयौवनायाः प्रागेवाष्टादशदिनात्प्राचुर्येण रजोनिर्गमस्तस्यास्त्रिरात्रमेवाशौचम्
पाराशरः स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरेण तोयेन स्नानं कृत्वा व्रतं चरेत् व्रतं रजस्वलानिय
मं चरेदित्यर्थः। सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन न वस्त्रपीडनं कुर्यात् नान्यद्वासश्च धारयेत् उशनाः
ज्वराभिभूता या नारी रजसा च परिप्लुता कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा। चतुर्थेहनि संप्राप्ते स्पृशे

णीतुया पंचरात्रं निराहारा पंचगव्येन शुद्ध्यति रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी तु या षड्रात्रेण विशुद्धिः स्याद्ब्राह्म
ण्याः कामचारतः अज्ञानतश्चरेदर्द्धं ब्राह्मणी सर्वस्पर्शने अत्र यथा रजस्वलाया ब्राह्मण्या रजस्वला ब्राह्मणी स्पर्शे उप
वासः पंचगव्यं च तथा क्षत्रियावैश्याशूद्राणां रजस्वलानां स्वस्वजातीयरजस्वलास्पर्शे उपवासः पंचगव्यं च यथा
ब्राह्मण्याः क्षत्रियास्पर्शे त्रिरात्रमेवं क्षत्रियाया वैश्यस्पर्शे वैश्यायाश्च शूद्रास्पर्शे त्रिरात्रमेव तदुक्तं रजस्वला य
दा नारी अन्योन्यमुपसंस्पृशेत् सवर्णे पंचगव्येन त्रिरात्रमसवर्णके पंचगव्येन उपवाससहितेन इत्यर्थः हीनव
र्णायास्तूत्तमवर्णरजस्वलास्पर्शे स्नानमात्रम् तथा च बृहस्पतिः अधिकवर्णा रजस्वलां स्पृष्टा स्नात्वाश्नीयाद्दिनि
एवं च क्षत्रियाया रजस्वलायाः शूद्रास्पर्शे पंचरात्रमित्यूहनीयं सर्वत्र चोपवासासामर्थ्ये अफालकृष्टनीवारा
दिप्रवर्त्तनं यत्तु मार्कण्डेयेनोक्तं उदक्या तु सवर्णा स्त्री स्पृष्टा चेत्स्यादुदक्यया तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नो
त्यसंशयं तत्स्नानात्पूर्वं चतुर्थदिनस्पर्शविषयं यदि तूच्छिष्टा रजस्वला उच्छिष्टरजस्वलया स्पृश्यते तत्र द्विराः
उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला पूर्वा कृच्छ्रं प्रकुर्वीत शूद्रा दानोपवासतः अत्र पूर्वाशब्दस्त्रैवर्णि
कस्त्रियमाह तेनायमर्थः ब्राह्मण्यादीनामुच्छिष्टानां रजस्वलानामुच्छिष्टसजातीयरजस्वलास्पर्शे कृच्छ्रं प्रा

त्यं द्वादशाहसाध्यं पूर्वप्रकरणशेषे कथितं एतच्च कामतो भुक्तोच्छिष्टाभ्यासविषयं अंगिराः भुक्तोच्छिष्टस्त्वनाचांत
श्चांडालैः श्वपचेन वा प्रमादात्स्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनं गायत्र्यष्टसहस्राणि द्रुपदां वा शतं जपेत् त्रि=
रात्रोपोषितो भूत्वा पंचगव्येन शुद्ध्यति श्वपचः डोम इति प्रसिद्धः इदमकामतो भुक्तोच्छिष्टविषयं आपस्त=
म्बः चांडालेन तु संस्पृष्टो विशेषेण द्विजोत्तमः उपोष्य रजनीमेकां पंचगव्येन शुध्यति इदमकामतोऽधउ=
च्छिष्टविषयं सर्वं चेदं रजस्वलास्पर्शे कुक्कुटादिभिस्तु नाभेरूर्ध्वस्पर्शे समानं विज्ञेयं नाभेरधः कुक्कुटादिभिः
स्पर्शे उच्छिष्टस्य स्नानमात्रं। तथा च कुक्कुटादीनुपक्रम्याङ्गिराः ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते तत्र
स्नानमधस्तात्तु क्षालनेनैव तच्छुचिः अत्रानुच्छिष्टस्य नाभ्यधः कुक्कुटादिस्पर्शे आचमनविधानादुच्छि=
ष्टस्य स्नानमेवायाति उच्छिष्टस्य मदिरास्पर्शे वृद्धमनुः जान्वधः स्नानमात्रं स्यादानाभेरेकरात्रकं। नाभेरू=
र्ध्वं त्रिरात्रं स्यान्मदिरास्पर्शने विधिः। हारीतः उच्छिष्टस्तु स्पृशेद्विप्रश्चांडालान्नं कथंचन उद्धौच्छिष्ट=
स्तु संस्पृष्टो द्विजः सांतपनं चरेत् अधोच्छिष्टो यदा तु स्यात्प्रायश्चित्तं भवेदिदं त्रिरात्रमुपवासः स्यात्पंचग=
व्येन शुद्ध्यति सांतपनं तु प्रथमदिने पंचगव्यमात्रपानं द्वितीयदिने उपवासः तथा च याज्ञवल्क्यः कुशोदकं

द्विजोमोहादाचामेत् प्रयत्नोपिसन् एतैःस्पृष्टोद्विजोच्छिष्टएकरात्रंपयःपिबेत् तैरुच्छिष्टैस्त्रिरात्रंस्या
त् घृतेप्राश्यविशुध्यति।पयोऽत्रजलं।सर्वत्रचात्रउभयोरप्युच्छिष्टयोःस्पर्शेद्विगुणंद्रष्टव्यं तथाचस्मृ
तिः उच्छिष्टोच्छिष्टसंस्पर्शःकदाचिदुपजायते वर्णानांतुसजातीनामुपस्पृश्यततःशुचिः उच्छिष्टस्यउच्छि
ष्टसंस्पर्शइत्यर्थः इदंचाकामतःस्पर्शविषयं।कदाचिदितिवचनात् कामतःस्पर्शे आपस्तम्बः विप्रोविप्रेण
संस्पृष्टउच्छिष्टेनकदाचन स्नायात्तेनविशुद्धिःस्यादापस्तंबोब्रवीदिदं क्षत्रियेणयदास्पृष्टउच्छिष्टस्तुकथंच
न स्नानंजपस्तुत्रैकाल्यंदिनस्यान्तेघृतंपिबेत् एवमेववैश्यस्पर्शेसर्वत्रद्वयोरपिउच्छिष्टत्वंज्ञेयं तथाउच्छि
ष्टोच्छिष्टसंस्पृष्टः शुनाशूद्रेणवैद्विजः उपोष्यरजनीमेकांपंचगव्येनशुद्ध्यति उच्छिष्टेनशूद्रेणउच्छिष्टस्पर्श
इत्यर्थः तथा तैलाभ्यक्तस्त्वनाचान्तः श्मश्रुकर्मणिमैथुने मूत्रोच्चारंयदाकुर्यादहोरात्रेणशुद्ध्यति उच्छिष्ट
स्यश्वकाकादिविष्टास्पर्शेस्नानशुद्धिप्रकरणएवशुद्धिरुक्ता चांडालादिस्पर्शे अकृतस्नानस्यशयनेदोषमाह
यमः चांडालैःश्वपचैःस्पृष्टोनिशिस्नानंसमाचरेत् नवसेत्सदनेरात्रौसद्यःस्नानेनशुध्यति अथतत्रवसेद्रात्रा
वज्ञानादविचक्षणः तदातस्यतुतत्पापंशतधापरिवर्तते अथस्वभावशुद्धाः तत्रमनुः नित्यंशुद्धः कारुहस्तः

भाः शुक्ताः।अजो हस्ती रणे छन्नं रश्मयश्चेन्दुसूर्ययोः।शुचिरग्निरजो वायुरापो दधि घृतं पयः सर्वाण्येतानि:
शुद्धानि स्पर्शे मेध्यानि नित्यशः।यस्मादेतानि शुद्धानि तस्मादशुचिसंस्पर्शे मेध्यानि छाया तु चांडालादन्यस्य मे
ध्या तथा च ब्रह्मपुराणे चांडालपतितच्छाया स्पर्शे दुष्टा न तु भवेत् सुमन्तुः घृतघटफलागाराणामभोज्यान्नानाम
दोषः।अभोज्यान्नानामपि घृतघटादयो न दुष्टा इत्यर्थः बैधायनः अदुष्टा संततना धारा वातोद्धूताश्च रेणवः आ
कराः शुचयः सर्वे वर्जयित्वा सुराकरं।शातातपः रेणवः शुचयः सर्वे वायुना समुदीरिताः अन्यत्र रासभाजा
विश्वसमूहनिवाससां समूहनिर्माजनी।देवलः गोशकृच्छुद्धदेशस्थं श्मशानानुद्धृतं शिवम् अगम्यागमृद्भवेः
च्छुद्धा शुक्रविण्मूत्रवर्जिता गोमयं शुद्धदेशस्थं शुचि।श्मशानानुद्धृतं शुचि।तेन श्मशानस्थितं न शुचि तेनेश्म
शानस्थितं यावद्भवति तावदेवाशुचीत्यर्थः यमः पृष्ठतो गौर्गजः स्कन्धे सर्वतोश्वः शुचिस्तथा नृणां मूत्रपुरीषे
च अमेध्ये मलमेव च।गोपुरीषं च मूत्रं च नित्यं मेध्यमिति स्थितिः शंखः शुद्धं नदीगतं तोयं सर्व एव तथा कराः
मुखवर्ज्या च गौः शुद्धा मार्जारः क्रमेण शुचिः देवलः अकश्मलैः समिद्धाग्निर्दुर्मनुष्यैरदूषितः सर्वेषामप्प
शौचानां समर्थाः शोधनायसः कश्मलेन रहितैः मूर्च्छारहितैरित्यर्थः समिद्धः प्रज्वालितः कश्मलं च देवलेन

अदृष्टमद्भिर्निर्णिक्तंय
त्पवित्रमितिस्थितिः अनुक्तशुध्यंतरे मनुः त्रीणिदेवाःपवित्राणिब्राह्मणानामकल्पयन् अदृष्टमद्भिर्निर्णिक्तंय
च्चवाचाप्रशस्यते। अदृष्टमपवित्रतयास्वयमज्ञातं। निर्णिक्तंप्रक्षालितं ब्राह्मणानामितिचातुर्वर्ण्योपलक्षणार्थमः
बलात्कारोपभुक्तायाचोरहस्तगतापिवास्वयंविप्रतिपन्नावा अथवाविप्रमादिता अत्यंतदूषितापिस्त्रीनप
त्यागमर्हति। सर्वेषामिष्कृतिः प्रोक्तानारीणांतुविशेषतः। एतत्समानविषयमेव। नस्त्रीदुष्यतिजारेणेतिवा
क्यं निष्कृतिःप्रायश्चित्तं। प्रायश्चित्त——मेवदर्शयति। स्त्रियःपवित्रमतुलंनैतादुष्यंतिकर्हिचित्। मासिमा
सिरजस्तासांदुष्कृतान्यपिकर्षति। सोमःशौचंददौतासांगंधर्वोश्चशुभांगिरं। पावकःसर्वमेध्यत्वंनित्यंमे
ध्याहियोषितः। याज्ञवल्क्यः व्यभिचाराहृतौशुद्धिर्गर्भेत्यागोविधीयते भर्तृगर्भबधेतासांतथामहतिपातके
अस्यार्थःस्त्रीणामृतौप्रवृत्ते सति पूर्वकृताद्यभिचाराच्छुद्धिर्भवति। व्यभिचारेणयदिगर्भोत्पन्नस्तदाऽस्याःस्त्रि
यःत्यागएवविधेयः। भर्तृबधेगर्भबधेमहापातकेचतस्यास्त्यागः। तथा। स्वच्छंदगाहि यानारीतस्यास्त्यागोवि
धीयते नचैवस्त्रीबधंकुर्यान्नचैवांगविकर्तनम् वसिष्ठःचतस्रस्तुपरित्याज्याःशिष्यगागुरुगाचया पतिघ्नीच
विशेषेणजुंगितोपगताचया। जुंगितोनिंदितःशूद्रादिः। हारीतःगर्भघ्नीअधोवर्णगांशिष्यसुतगामिनींपापव्य

५७ शौचनियमास्ततस्तेषांविशेषतः।शुद्धिरुक्तातनोऽशौचसंकरेशुद्धिरीरिता।विदेशस्थार्भकस्त्रीणांमरणेगर्भसं
स्रवे।शुद्धिर्मृत्युविशेषेचसासपिंडेष्वनंतरं। निर्हारादावथाशुद्धिरशुद्धिरहितास्तथा अधिकारिविवेको
थानधिकारिनिरूपणं जलाद्यनर्हकथनंपुत्राणांलक्षणं तथासपिंडानामिहततोलक्षणंपरिकीर्त्तितं। दे
हशुद्धिः क्षालनादिशुद्धिरत्रार्थकीर्त्तिता स्नानशुद्धिस्तैजसादिद्रव्यशुद्धिरनंतरं। पक्वान्नशुद्धिर्भूशुद्धिः शुद्धिर
न्नोदकस्यच।ततोरजस्वलाशुद्धिरुच्छिष्टस्पर्शनेनतथा।स्वभावशुद्धिस्त्वतथा क्रमेणात्रप्रकीर्त्तिताः॥ ८ ॥
इतिमहामहोपाध्यायलक्ष्मीधरात्मजमहामहोपाध्यायश्रीहलधरानुजनमश्रीरुद्रधरकृतःशुद्धिविवे=
कः समाप्तः॥ श्रीशुभं संवत् १९४० ॥ फागुनकृस्न २ ॥